महाभारते

भगवद्गीता सुबोधिनीटीकासहिता

११५८

३१

भगवद्गीताटीका सुबोधिनी

गीता संपूर्ण



श्रीधरीटीकासुबोधिनी

गी०

१ नं२

श्रीरामानमः॥ शेषाशेषमुखव्याख्याचातुर्यं त्वेकवक्त्रतः दधानमद्भुतं वंदे पर
मानंदमाधवम् १ श्रीमाधवं प्रणम्योमाधवं विश्वेशमादरात् तद्भक्ति
यंत्रितः कुर्वे गीताव्याख्यां सुबोधिनीं २ भाष्यकारमतं सम्यक् तद्व्याख्या
तृगिरस्तथा यथामति समालोच्य गीताव्याख्यां समारभे ३ गी
ताव्याख्यायते यस्याः पाठमात्रप्रयत्नतः सेयं सुबोधिनी टीका सदा
ध्येया सेंध्यां मनीषिभिः ४ इह खं सकललोकवंदितचरणः परमकारु लु ५
णिको भगवान्देवकीनंदनस्तत्वाज्ञानविजृंभितशोकमोहवि
भ्रंशितविवेकतया निजधर्मत्यागपरधर्माभिसंधिपरमर्जु
नं धर्मज्ञानरहस्योपदेशप्लवेन तस्माच्छोकसागरादुद्धार मोह२
तमेव भगवदुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लो॥॥ १

कशातेरूपनिबंध तत्रप्रायशः श्रीकृष्णमुखविनिसृतानेव श्लोकानलिखत् काश्चि
त्तत्संगतयेस्वयंमरचयत् यथोक्तं गीतामहात्म्ये गीतासुगीताकर्त्तव्या किमन्यैः
शास्त्रविस्तरैः यास्वयंपद्मनाभस्यमुखपद्माद्विनिसृताइति तत्रतावद्धर्मक्षेत्र

धृतराष्ट्रउवाच धर्मक्षेत्रेकुरुक्षेत्रेसमवेतायुयुत्सवः माम
काःपांडवाश्चैवकिमकुर्वतसंजय १ श्रीकृष्णायनमः

इत्यादिनाविषादंनिदमब्रवीदित्यंतेनश्रीकृष्णार्जुनसंवादप्रस्तावायकथानि
रूप्यते धृतराष्ट्रउवाच धर्मक्षेत्रेइति भोसंजयधर्मभूमौकुरुक्षेत्रेम॥
त्पुत्राःपांडुपुत्राश्चयुयुत्सवोयोद्धुमिच्छंतः समवेताः किंसंतकिंकृतवंतः १

गी०
१

संजय उवाच दृष्ट्वेति पांडवानीकं सैन्यं व्यूढं व्यूहरचनया व्यवस्थितं दृष्ट्वा द्रोणाचार्य स
मीपं गत्वा राजा दुर्योधनो वक्ष्यमाणं वाक्यमुवाच १ तदेव वचनमाह पश्यैतां पांडुमित्या
दिना बहुभिः श्लोकैः भो आचार्य पांडवानां विततां चमूं सेनां पश्य द्रुपदपुत्रेण धृष्टद्युम्नेन
व्यूढां व्यूहरचनया अधिष्ठितां २. अत्र शूरा इति अत्रा

संजय उवाच दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा आचार्यमुपसंगम्य राजा वचनमब्रवी
त् १ पश्यैतां पांडुपुत्राणामाचार्य महतीं चमूं व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता २ अ
त्र शूरा महेष्वासा भीमार्जुनसमा युधि युयुधानो विराटश्च द्रुपदश्च महारथः ३ धृष्टके
तुश्चेकितानः काशिराजश्च वीर्यवान् पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुंगवः ४ श्री श्रु।

स्यां चमूं वां इषवो बाणा अस्यंते क्षिप्यंते एभिरिति इष्वासो धनूंषि महांतः इष्वासो येषां ते तथा भीमार्जुनौ
तावद्यत्राविति प्रसिद्धौ योद्धारौ तेताभ्यां समाः शूराः संति तानेव नामभिर्निर्दिशति ३ युयुधानः २
सात्यकिः धृष्टकेतुरिति चेकितानो नाम कोपि राजा नरपुंगवो नरश्रेष्ठ शैब्य ४

युधामन्युश्चेति विक्रांतो युधामन्युर्नामैकः सौभद्रो अभिमन्युः द्रौपदेयाः द्रौपद्यां पंचभ्यो युधि
ष्ठिरादिभ्यो जाताः प्रतिविंध्यादयः पंच महारथादीनां लक्षणं एकोदशसहस्राणि यो
धयेद्यस्तु धन्विनां शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु संप्रो
क्तो

युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः
६ अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम नायका मम सैन्यस्य संज्ञार्थं तान्
ब्रवीमि ते ७ भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः अश्वत्थामा विकर्णश्च
सौमदत्तिस्तथैव च ८

तिरथस्ततः रथोत्तमे केन योद्धुं कृत्तं तन्त्रूनोर्द्धरथो मतः इति ६ अस्माकमिति नि ६
बोध बुध्यस्व नायकाः मम नेतारः संज्ञार्थं सम्यक् ज्ञानार्थमित्यर्थः ७ तानेवाह भवान्द्रो
णः समितिं संग्रामं जयतीति तथा सौमदत्तिः सौमदत्तस्य पुत्रो भूरिश्रवा ८ ७

गी० २

अन्ये चेति मदर्थे मत्प्रयोजनार्थं जीवितं त्यक्तुमध्यवसिता इत्यर्थः नानानेकानि शस्त्राणि प्रहर
णानि येषां ते युद्धे विशारदा निपुणा इत्यर्थः ९ ततः किमित्यत आह अपर्याप्तमिति तत्तथाभू
तैर्वीरैर्युक्तमपि भीष्मेणाभिरक्षितमप्यस्माकं बलं सैन्यं अपर्याप्तं तैः सह योद्धुमसमर्थं भाति
इदं तु एतेषां पाण्डवानां बलं भीमेनाभिरक्षि

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ९ अपर्याप्तं
तदस्माकं बलं भीष्माभिरक्षितं पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं १० अयनेषु च
सर्वेषु यथाभागमवस्थिताः भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ११

तं सत्पर्याप्तं समर्थं भाति १० तस्माद्भवद्भिरेवं वर्तितव्यमित्याह अयनेष्विति अयनेषु
व्यूहप्रवेशमार्गेषु यथाभागं विभक्तां स्वां स्वां रणभूमिमपरित्यज्यावस्थिताः सन्तो भीष्ममेवाभिर
क्षन्तु यथान्यैर्युध्यमानः पृष्ठतः कैश्चिन्न हन्येत तथा रक्षन्तु भीष्मबलेनैवास्माकं जीवनमिति भावः ११ २

तदेवं वदमानयुक्तं राजवाक्यं श्रुत्वा भीष्मः किं तवान् तदाह तस्येति तस्य राज्ञः हर्षं जनयन् कुर्व
न् पितामहो भीष्मः उच्चैर्महान्तं सिंहनादं कृत्वा शंखं दध्मौ वादितवान् १२ तदेव सेनापते
भीष्मस्य युद्धोत्सवमालक्ष्य सर्वतो युद्धोत्सवः प्रवृत्त इत्याह तत इति पणवाः आनका

तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रता
पवान् १२ ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः सहसैवाभ्यहन्यंत स शब्द
स्तुमुलोभवत् १३ ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ माधवः पाण्डव
श्चैव दिव्यौ शंखौ प्रदध्मतुः १४

गोमुखाश्च वाद्यविशेषाः सहसैव तत्क्षणमेव अभ्यहन्यंत वादिताः स च शंखादिशब्दस्तुम
लोमहत् अभवत् १३ ततः पाण्डवसैन्येपि प्रवृत्तयुद्धोत्सवमाह तत इति पंचभिः स्यंदने रथे स्थि
तौ सन्तौ कृष्णार्जुनौ दिव्यौ शंखौ प्रकर्षेण दध्मतुः वादयामासतुः १४ श्रीरामाय नमः राम राम

तदेवविभागेन दर्शयन्नाह पांचजन्यमिति पांचजन्यादिशब्दाः कृष्णादिशंखानांनामानि भीमंघोरं कर्म
यस्य स १५ अनंतविजयमिति नकुलः सुघोषंनामशंखं प्रदध्मौ सहदेवो मणिपुष्पकं च १६ का
श्यश्चेति काश्यः काशिराजः कथंभूतः परमेष्वासः इष्वासो धनुर्यस्य सः १७ द्रुपद इति

पांचजन्यं हृषीकेशो देवदत्तं धनंजयः पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः १५ अ
नंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः नकुलसहदेवश्च सुघोषमणिपुष्पकौ १६ का
श्यश्च परमेष्वासः शिखंडी च महारथः धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः
१७ द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक्
पृथक् १८ सघोषो धार्त्तराष्ट्राणां हृदयानि व्यदारयत् नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् १९

हे पृथिवीपते धृतराष्ट्र १८ स च शंखानां नादस्त्वदीयानां महाभयं जनयामासेत्याह सघोष इति धार्त्तरा
ष्ट्रादीयानां हृदयानि विदारयत् किं कुर्वन् नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् प्रतिध्वनिभिरापूरयन्

एतस्मिन्समये श्रीकृष्णमर्जुनो विज्ञापयामासेत्याह अथेति चतुर्भिः व्यवस्थितान्युद्धोद्योगेन-
स्थितान्कपिध्वजोऽर्जुनः परस्परं शस्त्रसमूहे प्रवृत्ते सतीत्यर्थः २० तदेव वाक्यमाह सेनयो
रिति ननु त्वं योद्धा न तु युद्धप्रेक्षकः तत्राह कैः सह मया योद्धव्यं २२ धार्त्तराष्ट्रस्य दुर्यो-

अथ व्यवस्थितान्दृष्ट्वा धार्त्तराष्ट्रान्कपिध्वजः प्रवृत्ते शस्त्रसंपाते धनुरुद्य
म्य पाण्डवः २० हृषीकेशं तदा वाक्यमिदमाह महीपते सेनयोरुभयोर्मध्ये रथं स्था
पय मेऽच्युत २१ यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् कैर्मया सह योद्धव्य
मस्मिन्रणसमुद्यमे २२ योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः धार्त्तराष्ट्र
स्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः २३

धनस्य प्रियं कर्त्तुमिच्छन्तो यद्दृष्ट्वा समागताः तान्यावत् द्रक्ष्यामि तावदुभयोः सेनयोर्म
ध्ये रथं स्थापयेत्यन्वयः २३

ततः किंवृत्तमित्यपेक्षायां संजय उवाच एवमिति गुडाका निद्रा तस्या ईशेन जितनिद्रेण
ऽर्जुनेनैवमुक्तः सन् हे भारत धृतराष्ट्र सेनयोरुभयोर्मध्ये रथानामुत्तमं रथं हृषीकेशः स्था

संजय उवाच एवमुक्तो हृषीकेशो गुडाकेशेन भारत सेनयोरुभयोर्मध्ये स्थापयित्वा
रथोत्तमम् २४ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् उवाच पार्थ पश्यैतान्
समवेतान्कुरूनिति २५ तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् आचार्या
न्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि २६

पितवान् २४ महीक्षितां राज्ञां च प्रमुखतः संमुखे रथं स्थापयित्वा हे पार्थ एतान् कुरून्पश्ये
त्युवाच २५ ततः किंवृत्तमित्याह तत्रेति पितॄनिति पितृव्यानित्यर्थः पुत्रान्पौत्रानिति दुर्योध
नादीनां ये पुत्राः पौत्राश्च तानित्यर्थः सखीन्मित्राणि सुहृदः कृतोपकारांश्चापश्यत् २६

ततः किं कृतवानित्यतआह तानिति किमब्रवीदित्यपेक्षायामाह दृष्ट्वेममित्यादि यावदध्या
यसमाप्तिः हे कृष्ण मयोद्धुमिच्छं तं पुरतः सम्यगवस्थितमिमं वंधुजनं दृष्ट्वा मदीयानि गात्रा
णि करचरणादीनि सीदंति शीर्यंते २८ किंच वेपथुश्चेति श्री रामायनम राम राम

तान्समीक्ष्य स कौन्तेयः सर्वान्वंधूनवस्थितान् कृपया परयाविष्टो विषी
दन्निदमब्रवीत् २८ अर्जुन उवाच दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुमुपस्थि
तं सीदंति मम गात्राणि मुखं च परिशुष्यति २९ वेपथुश्च शरीरे मे रोम
हर्षश्च जायते गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ३० नच शक्नोम्यवस्थातुं
भ्रमतीव च मे मनः निमित्तानि च पश्यामि विपरीतानि केशव ३१

वेपथुः कंपः रोमहर्षो रोमांचः स्रंसते निपतति परिदह्यते सर्वतः संतप्यते ३० नचे
ति विपरीतानि निमित्तान्यरिष्टसूचकानि शकुनानि पश्यामि ३१ राम राम राम

किंच नचेति स्वजनंआहवेहत्वा श्रेयःफलंनपश्यामि ३२ ननुविजयादिकंफलंकिंन
पश्यसीतिचेत्तत्राह नकांक्षेइति एतदेवप्रपंचयति किंनइति सार्द्धाभ्यां यदर्थंराज्यादि
कमपेक्षितंतएतेप्राणधनानित्यक्त्वात्यागमंगीकृत्ययुद्धार्थमवस्थितां अतःकिमस्माकं
राज्यादिभिःकृत्यमित्यर्थः ३३ ननुद्रोणादिकृपायात्वमेतान्नहंसितर्हित्वामेतेराज्यलो

नचश्रेयोनुपश्यामिहत्वास्वजनमाहवे नकांक्षेविजयंकृष्णनचराज्यंसुखानिच ३२
किंनोराज्येनगोविंदकिंभोगैर्जीवितेनवा येषामर्थेकांक्षितंनोराज्यंभोगाःसुखानि
च ३३ तइमेवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिच ३४ आचार्याःपितरःपुत्रास्तथै
वचपितामहाः मातुलाःश्वशुराःपौत्राःश्यालाःसंबंधिनस्तथा ३५ एतान्नहंतुमि
च्छामिघ्नतोपिमधुसूदन अपित्रैलोक्यराज्यस्यहेतोःकिंनुमहीकृते निहत्यधार्त्तराष्ट्रान्नः
काप्रीतिःस्याज्जनार्द्दन ३६

र्हिंत्वामेतेराज्यलोभेनहनिष्यंत्येव अतस्त्वमेवैतान्हत्वाराज्यंभुंक्ष्वतत्राह सार्द्धेनएतानिति घ्न
तोपिअस्मान्घातयतोप्येतान्त्रैलोक्यराज्यस्यापिहेतोःतत्प्राप्त्यर्थमपिहंतुनेच्छामि किंपुनर्म

ननु च अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारहरश्चैव षडेते आततायिनः॥ इति स्मरणा
दग्निदत्वादिभिः षड्भिरपि हेतुभिरेते तावदाततायिनः। आततायिनां च वधो युक्त एव। आ
ततायिनमायांतं हन्यादेवाविचारयन्। नाततायिवधे दोषो हन्तुर्भवति कश्चनेति वचनात्
आह सोर्जुन पापमिति आततायिनमायांत

पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः। तस्मान्नार्हा वयं हन्तुं
धार्त्तराष्ट्रान्सबांधवान्। स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ३७

मित्यादिकमर्थशास्त्रं। आह
मित्यादिकमर्थशास्त्रं हि तच्च धर्मशास्त्रात् दुर्बलं यथोक्तं याज्ञवल्क्येन स्मृत्योर्विरोधे न्याय
स्तु बलवान् व्यवहारतः। अर्थशास्त्राच्च बलवद्धर्मशास्त्रमिति स्थितिः। तस्मादाततायिनामप्ये
तेषामाचार्यादीनां वधेऽस्माकं पापमेव भवेत्। अन्याय्यत्वादधर्मत्वाच्चैतद्वधस्य न च हत्वा सुखं स्यादित्याह स्व

श्री०
७

ननुतर्ह्येतेषामपिबंधदोषसमानेसति यथैवैतेबंधुवधमंगीकृत्ययुद्धेप्रवर्त्तन्ते तेतथैवत्वमपि १भवान्
प्रवर्त्ततांकिमनेनविषादेनेत्यतआहद्वाभ्यां यद्यपीति राज्यलोभेनोपहतंभ्रष्टंविवेकंचेतोये
षांतेएतेदुर्योधनादयोयद्यपिदोषंनपश्यंतितथाप्यस्माकमिदोषंप्रपश्यद्भिरस्मात्पापात्नि
वर्त्तितुंकथंनज्ञेयंनिवृत्तावेवबुद्धिः कर्त्तव्येत्यर्थः कुलक्षयइति सनातनाःपरंपराप्रा

यद्यप्येतेनपश्यंतिलोभोपहतचेतसः कुलक्षयकृतंदोषंमित्रद्रोहेचपातकं ३८
कथंनज्ञेयमस्माभिः पापादस्मान्निवर्त्तितुं कुलक्षयकृतंदोषंप्रपश्यद्भिर्जनार्दन
३९ कुलक्षयेप्रणश्यंतिकुलधर्माःसनातनाः धर्मेनष्टेकुलंकृत्स्नमधर्मोभिभव
त्युत ४० अधर्माभिभवात्कृष्णप्रदुष्यंतिकुलस्त्रियः स्त्रीषुदुष्टासुवार्ष्णेयजा
यतेवर्णसंकरः ४१ संकरोनरकायैवकुलघ्नानांकुलस्यच पतंतिपितरोह्येषांलु
प्तपिंडोदकक्रियाः ४२ त्यर्थः ३२

तमेवदोषंदर्शयति कुलक्षयइतिसनातनाःपरंपराप्राप्ताः उतअपिकृत्स्नमपि अवशिष्टंकुलं
अधर्मोभिभवतिव्याप्नोति ४० ततश्चाधर्माभिभवादिति ४१ एवंचसतिसंकरइति एषांकुल
घ्नानांपितरःपतंतिहियस्मात् लुप्तःपिंडोदकक्रियायेषांते ४२

७

उक्तदोषमुपसंहरति द्वाभ्यां दोषैरेतैरिति उत्साद्यंते लुप्यंते जातिधर्माः वर्णधर्माः कुलध
र्माश्च येषां ते चकारादाश्रमधर्मादयोपि गृह्यंते उत्सन्नेति उत्सन्नाः कुलधर्माः येषां ते
इत्युत्सन्नजातिधर्मादीनामप्युपलक्षणं अनुशुश्रुम श्रुतवंतो वयं ४३ प्राय

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः उत्साद्यंते जातिधर्माः कु
लधर्माश्च शाश्वताः ४३ उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन
नरकेऽनियतं वासो भवतीत्यनुशुश्रुम ४४ अहो बत महत्पापं क
र्तुं व्यवसिता वयं यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यता ४५

श्चित्तमकुर्वाणा पापेषु निरताः नरा अपश्चात्तापिनः कष्टान्निरयान्यांति दारुणानित्यादिव
चनेभ्यः ४४ बंधुवधव्यवसायेन संतप्यमान आह अहो इति स्वजनं हंतुं उद्यता इति य
त् एतं महत्पापं कर्तुमध्यवसायं कृतवंतो वयं अहो बत कष्टमित्यर्थः ४५ श्रीराम

श्री० एवं संतप्तः सन्नमत्युमेवाशाशानश्चानश्चाह यदीति अकृतप्रतीकारं तूष्णीमुपविष्टं मां
८ यदिहनिष्यंति तर्हि तद्धननं मम क्षेमतरं अत्यंतं हितं भवेत् पापान्निवृत्तेः रामरामराम

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः धार्त्तराष्ट्रा रणेहन्युस्तन्मे क्षेमतरं भवेत्
४६ संजयउवाच एवमुक्त्वाऽर्जुनः संख्ये रथोपस्थ उपाविशत् विसृज्य स
शरं चापं शोकसंविग्नमानसः ४७ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मवि
द्यायां योगशास्त्रे श्रीकृष्णाऽर्जुनसंवादे अर्जुनविषादो नाम प्रथमोऽध्यायः

४६ ततः किं वृत्तमित्यपेक्षायां संजयउवाच एवमिति संख्ये संग्रामे रथोपस्थाउ
परि उपाविशत् उपविवेश शोकेन संविग्नं प्रकंपितं मानसं चित्तं यस्य सः ४७ इति
सुबोधिन्यां प्रथमोऽध्यायः

ततः किं वृत्तमित्यपेक्षायां संजय वाक्यं तं तथेति अश्रुभिः पूर्णे आकुले ईक्षणे यस्य तं तथोक्तप्रकारेण विषीदंतं तमर्जुनं प्रति मधुसूदन इदं वाक्यमुवाच १ तदेव वाक्यमाह कुत इति कुतो हेतोः त्वा इति त्वां विषमे संकटे इदं कश्मलमुपस्थितं अयं मोहः प्राप्तः यतः आर्यैरसेवितमस्वर्ग्यमधर्म्यमयशस्करं च २ तस्मात् क्लैब्यमिति हे पार्थ क्लैब्यं कातर्यं मा स्म गमः न प्राप्नुहि यतस्त्वय्येतन्नोपपद्यते योग्यं न भवति क्षुद्रं हृदयदौर्बल्यं कातर्यं त्यक्त्वा युद्धायोत्तिष्ठ हे परंतप शत्रुतापन ३ नाहं कातर

संजय उवाच तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं विषीदंतमिदं वाक्यमुवाच मधुसूदनः १ श्रीभगवानुवाच कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन २

त्वेन युद्धादुपरतोऽस्मि किंतु युद्धस्यान्याय्यत्वादिति अर्जुन उवाच राम राम राम॥

भ्गा०
५
१

कथंभीष्ममिति भीष्मद्रोणौपूजायामर्हौपूजायोग्यौतौप्रतिकथं अहंयोत्स्यामि तत्रा

क्लैव्यमास्मगमःपार्थनैतत्वय्युपपद्यते क्षुद्रं
हृदयदौर्वल्यंत्यक्त्वोत्तिष्ठपरंतप ३ अर्जुनउवाच
कथंभीष्ममहंसंख्येद्रोणंचमधुसुदन इषु॥
भिःप्रतियोत्स्यामिपूजार्हावरिसुदन ४ श्रीराम

पिइषुभिःपत्रवाचापियोत्स्यामिइतिवक्तुमनुचितं तत्रवाणैःकथंयोत्स्यामिइत्यर्थः
हेअरिसुदानशत्रुसुदन ४ राम
५

तर्हि तवदेहयात्रापिनस्यादिचेत्तत्राह गुरूनिति गुरून् द्रोणादीन् अहत्वापरलोकविरुद्धो गुरुवधस्त
मकृत्वाइहलोकेभिक्षान्नमपिभोक्तुंश्रेयउचितं विशेषतुनकेवलंपरत्रदुःखंइहैवतुनरकदुःखमनु
भवेयमित्याह गुरूनहत्वाइहैवतुरुधिरेणप्रदिग्धानप्रकर्षेणलिप्तान् अर्थकामात्मकान्भोगान् अहंभुंजी
यातीय पश्चार्थकामानितिरगुरूणांविशेषणं अर्थतृष्णाकुलत्वादेतेतावध्यास्तत्र तस्मादेतद्वयं
नपुज्यतेवेत्यर्थः तथाचयुधिष्ठिरंप्रतिभीष्मेणोक्तं अर्थस्य

गुरूनहत्वाहिमहानुभावान् श्रेयोभोक्तुंभैक्ष्यमपीहलोके हत्वार्थकामांस्तुगुरूनिहैवभुंजीयभोगानरु
धिरप्रदिग्धान् ५ नचैतद्विद्मः कतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुः यानेवहत्वानजिजीविषाम
स्तेवस्थिताः प्रमुखेधार्त्तराष्ट्राः ६

पुरुषोदासेदासस्त्वर्थोनकस्यचित् इतिसत्यंमहाराजबद्धोस्म्यर्थेनकौरवैरिति ५ किंचयद्यप्यधर्ममंगीकरि
ष्यामस्तथापिकिमस्माकंजयः पराजयोवाभवेदितिनज्ञायतेइत्याह नचैतदितिएतद्वयोर्मध्येनः अस्माकंक
तरत्किंनामगरीयः अधिकतरंभवतीतिनविद्मः तदेवद्वयंदर्शयति यद्वाजयेम एतान्वयंजेष्यामःयदिवान
अस्मान् एतेजययुः जेष्यंतीति किंचअस्माकंजयोपिफलतः पराजयएवेत्याह यानेवहत्वाजीवितुनेच्छामः त

गी०
१०
10

तस्मात् कार्पण्येति एतान् हत्वा कथं जीविष्यामि इति कार्पण्यं दोषः स्वकुलक्षयकृतः ताभ्यामुपहतः अभिभूतः
स्वभावः शौर्यादिलक्षणो यस्य सोऽहं त्वां पृच्छामि तथा धर्मे संमूढं चेतो यस्य सः युद्धं त्यक्त्वा भिक्षाटनमपि क्ष
त्रियस्य धर्मो वा अधर्मो वेति संदिग्धचित्तः सन्नित्यर्थः अतो मे यन्निश्चितं श्रेयो युक्तं स्यात् तद्ब्रूहि किं
च तेऽहं शिष्यः शासनार्हः अतस्त्वं प्रपन्नं शरणागतं मां शाधि शिक्षय उपदेशं कुरु ७ त्वमेव विचार्य युक्तं त

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्य
स्तेऽहं शाधि मां त्वां प्रपन्नं ७ न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां अवाप्य भूमा
वसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यं ८ संजय उवाच एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप
न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ९

तत्कुर्विति चेत् तत्राह नहीति इंद्रियाणामुच्छोषणमतिशोषकरं मदीयं शोकं यत्कर्मापनुद्यात् अपनयेत् तत्
दहं न प्रपश्यामि यद्यपि भूमौ निष्कंटकं समृद्धं राज्यं प्राप्नोमि तथा सुरेंद्रत्वमपि दिप्राप्स्यामि एवमभीष्टं तत्स राम
र्वमवाप्यापि शोकापनोदनोपायं न प्रपश्यामि इति अन्वयः ८ एवमुक्त्वार्जुनः किं कृतवान् इत्यपेक्षायां संज १०
य उवाच एवमिति स्पष्टार्थं ९

ततः किं कृतमित्यत आह तमुवाचेति प्रहसन्निवेति प्रसन्नमुखः हसन्नित्यर्थः १० देहात्मनोरविवेका
त्पैवशोको भवतीति तद्विवेकप्रदर्शनार्थः श्रीभगवानुवाच अशोच्यानिति परमार्थस्वरूपेण शोकस्याविष
टाभूतानिबन्धूंस्त्वमन्वशोचः अनुशोचितवानसि दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् इत्यादिना त
त्वकुतस्त्वा कश्मलमिदं विषमे समुपस्थितं इत्यादिना मया बोधितोपि पुनश्च प्रज्ञावादान् प्रज्ञावतां पण्डितानां
वादान् शब्दान् कथं भीष्ममहं संख्ये इत्यादीन् केवलं भाषसे न तु पंडितोसि यतः गतासून् गतप्राणान् बंधून् अगतासून्

तमुवाच हृषिकेशः प्रहसन्निव भारत सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः १० श्रीभगवानुवाच
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे गतासूनगतासूंश्च नानुशोचंति पंडिता ११ न त्वेवा
हं जातु नासं न त्वं नेमे जनाधिपाः न चैव न भविष्यामः सर्वे वयमतः परं १२ रामराम रामामा॥

पि बंधुहीनराते कथं जीविष्यति इति नानुशोचंति ११ अशोच्यत्वे हेतुमाह न त्वेवाहमिति यथा वाहमि
ति यथाहं परमेश्वरो जातु कदाचित् लीलाविग्रहस्याविर्भावतिरोभावेपि नासमिति तु नैव अपि तु आसमेवा
नादित्वात् न च त्वं नासीः नाभूः अपि तु आसीः इमे च जनाधिपान् नृपा नासन्निति न अपि तु आसन्नेव मदंशत्वा
त् तथा अतः परं इतः उपर्यपि न भविष्यामः न स्यास्यामः इति च नैवापि तु स्यास्यामः एवं जन्ममरणशून्यत्वादशोच्या इत्यर्थः १२

गी०
११

ननु ईश्वरस्य तव जन्मादि मिथ्यैव जीवानां तु जन्ममरणे प्रसिद्धे इत्यत्राह देहिन इति देहिनो देहाभिमा
निनो जीवस्य यथास्मिन् स्थूले देहे कौमाराद्यवस्था देहनिबंधना एव न तु स्वतः पूर्वावस्थानाशे अवस्थांत
रोत्पत्तावपि स एवाहमिति प्रत्यभिज्ञानात् तथैव एतत् देहनाशे देहांतरप्राप्तिरपि लिंगदेहनिबंधना न तु ता
वदात्मनो नाशः जातमात्रस्य पूर्वसंस्कारेण स्तन्यादौ प्रवृत्तिदर्शनात् अतो धीरो धीमान् तयोर्देहनाशोत्प
त्योर्न मुह्यति आत्मैव मृतो जातश्चेति न मन्यते १३ ननु गतासूनगतासून्नहं न शोचामि किंतु द्वियोगादिदुः

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति १३
मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत १४

खभाजं मामेवेति चेत् तत्राह मात्रास्पर्शा इति मीयंते विषया आभिरिति मात्रा इंद्रियवृत्तयः तासां स्पर्शाः विष
यैः संबंधाः ते शीतोष्णादिप्रदा भवंतीति ते त्वागमापायित्वादनित्या अस्थिराः अतस्तांस्तितिक्षस्व सहस्व यथा
जलातपादिसंपर्काः तत्तत्कालकृताः स्वभावतः शीतादि प्रयच्छंति एवमिष्टसंयोगवियोगा अपि सुखदुः राम
खादि प्रयच्छंति तेषां चास्थिरत्वात् तत्सहनं तव धीरस्योचितं न तु तन्निमित्तहर्षविषादादिपारवश्यमित्यर्थः १४ ११

तत्प्रतीकारप्रप त्र्चैदपितत्सहनमेवोचितमहाफलत्वादित्याह यंहीति एतेमात्रास्पर्शायंपुरुषंनव्यथयंतिनाभि
भवंति समेसुखेदुःखेयस्मात् सहंतेविक्षिप्यमाणोधर्मज्ञानाद्यात्स्वमतत्वायमोक्षायकल्पतेयोग्योभवति १५

ननुतथापिशीतोष्मादिकमतिदुःसहंकथंसोढव्यमल्पंतंसहनेचकदाचिदात्मनाशस्यापिसंभवादित्याशंक्यतत्व
विचारतः सर्वंसोढुंशक्यमित्याशयेनाह असत अनात्मधर्मत्वादविद्यमानस्यशीतोष्मादेरात्मनिनाभावः

यंहिनव्यथयंत्येतेपुरुषंपुरुषर्षभ समदुःखसुखंधीरंसोमृतत्वायकल्पते १५ नासतो॥
विद्यतेभावोनाभावोविद्यतेसतः उभयोरपिदृष्टोंतस्त्वनयोस्तत्वदर्शिभिः १६ अविना॥
शितुतद्विद्धियेनसर्वमिदंततम् विनाशमव्ययस्यास्यनकश्चित्कर्तुमर्हति १७ रामराम

सत्तानविद्यते तथासतः सत्स्वभावस्यात्मनः अभावोविनाशोनविद्यते एवमुभयोःसदसतोरंतोनिर्णयो
दृष्टःकैस्तत्वदर्शिभिर्वस्तुयाथात्म्यवद्भिः एवंभूतविवेकेनसहस्वेत्यर्थः १६ तत्रसत्स्वभावमविनाशिवस्तु
सामान्येनोक्तंविशेषतोदर्शयति अविनाशीति येनसर्वमिदमागतायायधर्मकंदेहादिकंततंसाक्षित्वेनव्या
प्तंतत्तुआत्मस्वरूपमविनाशिविनाशशून्यंविद्धिजानीहितत्रहेतुमाहविनाशमिति १७ रामरामराम॥

गी० १२

12

आगमापायापि धर्मकर्म स दर्शयति अंतवंत इति अतो नाशो विद्यते येषां ते अंतवंतः नित्यस्य सर्वदैकरूपस्य
शरीरिणः शरीरवतः अतएवानाशिनः अप्रमेयस्यापरिछिन्नस्यात्मनः इमे सुखदुःखादिधर्मका देहा
उक्तास्तत्वदर्शिभिः यस्मादेवमात्मनो न विनाशः न च सुखदुःखादिसंबंधः तस्मान्मोहजं शोकं त्यक्त्वा

अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः अनाशिनोप्रमेयस्य तस्माद्युध्यस्व भारत १८

य एनं वेत्ति हंतारं यश्चैनं मन्यते हतं उभौ तौ न विजानीतो नायं हंति न हन्यते १९ राम॥

युध्यस्व स्वधर्मं मा त्याक्षीरित्यर्थः १८ तदेवं भीष्मादिमृत्युनिमित्तः शोको निवारितः यच्चात्मनो हंतृत्व
निमित्तं दुःखमुक्तं एतान्न हंतुमिच्छामीत्यादिना तदपि तद्वदेव निर्निमित्तमित्याह य एनमिति य एनमात्म
नं हननक्रियायाः कर्तारं कर्मभूतं च वेत्ति तमपि नास्तीत्यर्थः तत्र हेतुर्नायमिति १९ रामरामरामम॥ राम १२

न हन्यत इत्येतदेव षड्भावविकारशून्यत्वेन द्रढयति नेति न जायत इति जन्मप्रतिषेधः न म्रियते वेति वि
नाशप्रतिषेधः वाशब्दश्चार्थे न चायं भूत्वा उत्पद्य भविता भवति अस्तित्वं भजते किंतु प्रागेव स्वतः सद्रूप इति जन्मानंतराऽस्ति
त्वलक्षणद्वितीयविकारप्रतिषेधः तत्र हेतुः यस्मादजः यो हि जायते स जन्मानंतरमस्तित्वं भजते न तु यः स्वयमेवास्ति
स भूयो अन्यदस्तित्वं भजत इत्यर्थः नित्यः सर्वदैकरूप इति वृद्धिप्रतिषेधः शाश्वतः शश्वद्भव इति अपक्ष

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः अजो नि
त्यः शाश्वतोऽयं पुराणो न हन्यमाने शरीरे २०

यप्रतिषेधः पुराण इति विपरिणामप्रतिषेधः पुरापि नव एव न तु परिणामतो रूपांतरं प्राप्य नवो भवतीत्यर्थः
यद्वा न भवितेत्यस्यानुषंगं कृत्वा भूयः अधिकं यथा भवति तथा न भवतीति वृद्धिप्रतिषेधः अजो नित्य इति चो
भयत्र बाधाभावे हेतुरित्यपौनरुक्त्यं तदेवं जायते अस्ति वर्द्धते विपरिणमते ऽपक्षीयते विनश्यतीत्येवं यास्कादि
भिरुक्ताः षड्भावविकारा निरस्ताः यदर्थमेते विकारा निरस्ताः तं प्रस्तुतं विनाशाभावमुपसंहरति रामराम

गी०
१२
13

अत एव हंतृत्वाभावोपि पूर्वोक्तः सिद्ध इत्याह वेदेति नित्यं वृद्धिशून्यं अव्ययं क्षयशून्यं अजं अविनाशिनं च यो
वेद स पुरुषः कं हंति कथं वा हंति एवंभूतस्य वधे साधनाभावात् तथा स्वयं प्रयोजको भूत्वा अन्येन कं घातयति
कथं वा घातयति न कथंचिदपीत्यर्थः अनेन मम्यपि प्रयोजकत्वदोषदृष्टिर्माभूदित्युक्तं भवति २१ ननु आत्मा
नः अविनाशेपि तदीयशरीरनाशं पर्यालोच्य शोचामीति चेत् तत्राह वासांसीति कर्मनिबंधनानां नूत

वेदाविनाशिनं नित्यं य एनमजमव्ययं कथं स पुरुषः पार्थ कं घातयति हंति कं २१ वासांसि जी
र्णानि यथा विहाय नवानि गृह्णाति नरोपराणि तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवा
नि देही २२ नैनं छिंदंति शस्त्राणि नैनं दहति पावकः न चैनं क्लेदयंत्यापो न शोषयति मारुतः २३

नानां देहानामवश्यंभावित्वान्न जीर्णदेहनाशे शोकावकाश इत्यर्थः २२ कथं हंतीत्यनेनोक्तं वधसाध
नाभावं दर्शयन् अविनाशित्वमात्मनः स्फुटीकरोति नैनमिति आपो नैनं क्लेदयंति मृदुकरणेन शि
थिलं न कुर्वंति मारुतोप्येनं न शोषयतीति निरवयवत्वात् २३ रामराम रामराम रामराम रामराम राम
१३

तत्र हेतूनाह अच्छेद्य इत्यादि सार्धेन निरवयवत्वात् अच्छेद्योयं अक्लेद्यश्चामूर्त्तत्वात् अदाह्यः द्रवत्वाभावाद

शोष्य इति इति अच्छेदादियोग्यो न भवति यतो नित्यः अविनाशी सर्वगतः सर्वत्रगतः स्थाणुः स्थिरस्वभावः रूपांतरास्

त्तिशून्यः अचलः पूर्वरूपाप्रच्युतिमानमी सनातनः अनादिः २४ किंच अव्यक्त इति अव्यक्तश्चक्षुराद्यवि

षयः अचिंत्यो मनसोप्यविषयः अविकार्यः कर्मेंद्रियाणामपि अगोचर इत्यर्थः उच्यत इति नित्यत्वादाव

अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव च नित्यः सर्वगतः स्थाणुरचलोयं सनातनः २४ अव्यक्तो

यमचिंत्योयमविकार्योयमुच्यते तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि २५ अथ चैनं नित्यजातं नि

त्यं वा मन्यसे मृतं तथापि त्वं महाबाहो नैवं शोचितुमर्हसि २६

भिधुक्तोंप्रमाणपतिउपसंहरति तस्मादिति २५ तदेवमात्मनो जन्मविनाशाभावान्न शोकः कार्य इत्यु

क्तं इदानीं देहेन सहात्मनो जन्म तद्विनाशेन च विनाशं अंगीकृत्यापि शोको न कार्य इत्याह अथ चेति अ

थ यद्यपि एनमात्मानं नित्यं सर्वदा तत्तद्देहे जाते जातं मन्यसे तथा तत्तद्देहे मृते मृतं मन्यसे पुण्यपापयोस्त

त्फलभूतयोश्च जन्ममरणयोरात्मगामित्वात् तथापि त्वं शोचितुं नार्हसि २६ रामरामरामराम

गी०
१६
14

कुतइत्यतआह जातस्येतिहियस्मात् जातस्यस्वारंभककर्मक्षयमृत्युः ध्रुवोनिश्चितः मृतस्यतत्तद्देहेनकृते
नकर्मणाजन्मापिध्रुवमेव तस्मादेवमपरिहार्येऽर्थे अवश्यंभाविनिजन्ममरणलक्षणेर्थेविषयेत्वंशोचितुं
नार्हसियोग्योनभवसि २७ किंचदेहानांचस्वाभावंपर्यालोच्यतदुपाधिकेआत्मनोजन्ममरणेऽपि
शोकोनकार्यइत्याह अव्यक्तादीनीति अव्यक्तंप्रधानंतदेवादिः उत्पत्तेःप्राक्रूपंयेषांतानिअ

जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच तस्मादपरिहार्येर्थेनत्वंशोचितुमर्हसि २७ अ
व्यक्तादीनिभूतानिव्यक्तमध्यानिभारत अव्यक्तनिधनान्येवतत्रकापरिदेवना २८॥

रूपंयेषांतानिअव्यक्तादीनिभूतानिशरीराणिकारणात्मनास्थितानामेवोत्पत्तेः तथाव्यक्तमभिव्य
क्तंमध्यंजन्ममरणांतरालस्थितिलक्षणंयेषां अव्यक्तेनिधनंलयोयेषांतानिइमान्येवंभूतान्ये
वतत्रतेषुकापरिदेवनाकःशोकनिमित्तकोविलापः प्रतिबुद्धस्यस्वप्नदृष्टवंधुष्विवशोकोनयुज्यतइत्यर्थः २८

राम
१६

कुतस्तर्हि विद्वांसोपि लोके शोचंति आत्माज्ञानादेवेत्याशयेनात्मनो दुर्विज्ञेयतामाह आश्चर्यवदिति कश्चिदे
नमात्मानं शास्त्राचार्योपदेशाभ्यां पश्यन् आश्चर्यवत्पश्यति सर्वगस्य नित्यज्ञानानंदस्वभावस्यात्मनोऽलौकिक
त्वादैंद्रजालिकवद्घटमानं पश्यन्निव विस्मयेन पश्यति असंभावनाभिभूतत्वात् तथा आश्चर्यवदेवान्यो वद
वादति शृणोति चान्यः कश्चित्तु नर्विपरीतभावनाभिभूतः श्रुत्वापि नैव वेद चशब्दादुक्त्वापि न सम्यक्वे

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं
वेद न चैव कश्चित् २९ देही नित्यमवध्योयं देहे सर्वस्य भारत तस्मात्सर्वाणि भूतानि न
त्वं शोचितुमर्हसि ३० स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते ३१

देतिद्रष्टव्यं २९ तदेवं दुर्बोधमात्मतत्वं संक्षेपेणोपदिशन् अशोच्यत्वमुपसंहरति देहीति ३० यच्चोक्त
मर्जुनेन वेपथुश्च शरीरे मे रोमहर्षश्च जायते इति तदप्ययुक्तमित्याह स्वधर्ममिति आत्मनो नाशाभावादेवै
तेषां हननेपि विकंपितुं नार्हसि किंच स्वधर्ममपि अवेक्ष्य विकंपितुं नार्हसीति संबंधः यच्चोक्तं न च श्रे
योनुपश्यामि हत्वा स्वजनमाहवे इत्यादि तत्राह धर्म्यादिर्नपेतात् न्याय्याद्युद्धादन्यत् ३१ रामराम

किंचमहतिश्रेयसिस्वयमेवोपयोगेसति कुतोविकंपसेइत्याह यदृच्छयेति यदृच्छया अप्रार्थितमेवोपपन्नं
प्राप्तमीदृशंयुद्धंसुखिनः साभाग्याएवलभंतेतराावसुखिनइत्यर्थः यतोनिसवरणाभ्रस्वर्गद्वारमेवैतत्
यघाएवंविद्धंलभंतेतयसुखिनइत्यर्थः एतेनस्वजनंहिकथंहत्वासुखिनस्यामममाधवेतियेदुक्तंतन्नि
रस्तंभवति ३२ विपक्षेदोषमाह अथचेत्वमिममिति ३३ किंचाकीर्त्तिमिति अव्ययांशाश्वतीसं

यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशं ३२ अथचेत्व
मिमंधर्म्यंसंग्रामंनकरिष्यसि ततःस्वधर्मंकीर्त्तिंचहित्वापापमवाप्स्यसि ३३ अकीर्तिंचापिभूतानि
कथयिष्यंतितेव्ययां संभावितस्यचाकीर्त्तिर्मरणादतिरिच्यते ३४ भयाद्रणादुपरतंमस्यंतेत्वां
महारथाः येषांचत्वंवहुमतोभूत्वायास्यसिलाघवम् ३५

श्वतींसंभावितस्यवहुमानितस्यकीर्त्तिर्मरणादतिरिच्यते अधिकाभवति ३४ किंचाभयाद्दिति
येषांवहुगुणत्वेनेत्वेनपूर्वंसंमतोभू तएवभयेनसंग्रामात्त्वांनिवर्त्तंमन्येरन् ततश्चपूर्वंवहुमतो
भूत्वालाघवंयास्यसि ३५

किंचावाच्यवादानवचनानर्हान्शब्दान्तवाहितास्तवशत्रवोवदिष्यंति ३६ यच्चोक्तंनचैतद्विद्मःकतरन्नो
गरीयोयद्वाजयेमयदिवानोजयेयुरिति तत्राह हतोवेति यद्यपिपरेणापितवलाभएवेत्यर्थः ३७ यदप्युक्तंपापमेवा
श्रयेदस्मानितितत्राह सुखदुःखेइति सुखदुःखेसमेकृत्वातथातयोःकारणभूतौलाभालाभावपितयोरपिका
रणभूतौजयाजयावपिसमौकृत्वाएतेषांसमत्वेकारणंहर्षविषादराहित्यंयुज्यस्वसन्नद्धोभवसुखाभिलाषंहि
त्वाधर्मंवुध्यायुध्यमानपापंनप्राप्स्यसीत्यर्थः ३८ उपदिष्टंज्ञानयोगमुपसंहरन्तत्साधनंकर्मयोगंप्रस्तौति

अवाच्यवादांश्चवहून्वदिष्यंतितवाहिताः निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिं ३६ हतोवाप्राप्स्यसि
स्वर्गंजित्वावाभोक्ष्यसेमहीं तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः ३७ एसांतेभिं सुखदुःखेसमेकृत्वा
लाभालाभौजयाजयौ ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यसि ३८ एसातेभिहितासांख्येवुद्धिर्योगेत्वि
मांशृणु वुध्यायुक्तोययापार्थकर्मवंधंप्रहास्यसि ३९

तत्साधनंचकर्मयोगंप्रस्तौति एषेति सम्यक्ख्यायतेप्रकाश्यतेवस्तुतत्त्वमनयेतिसंख्यासम्यक्ज्ञानंतस्मिन् प्रका
शमानमात्मतत्त्वंसांख्यंतस्मिन्करणीयावुद्धिरेषातवाभिहिता एवमभिहितायामपिसांख्यवुद्धौतवचेदात्मत
त्त्वमपरोक्षंनसंभवतितर्हितः करणशुद्धिद्वारात्मतत्त्वापरोक्षार्थंकर्मयोगेत्विमांवुद्धिंशृणु ययावुध्यायुक्तः
परमेश्वरार्पितकर्मयोगेनशुद्धांतःकरणःसन्तत्प्रसादप्राप्तापरोक्षज्ञानेनकर्मात्मकंवंधंप्रहास्यसित्यक्ष्यसि
३९

ननु कृष्याद्यादिवत्कर्मणां कदाचिद्विघ्नबाहुल्येनफलव्यभिचारात्मंत्राद्यंगुण्येनचप्रत्यवायसंभवात्कुतः कर्मयोगेन
कर्मबंधप्रहरणंतत्राह नेहेति इहनिष्कामकर्मयोगेअभिक्रमस्यप्रारंभस्य नाशोनिष्फलत्वंनानास्ति प्रत्यवायश्चन
विद्यतेइश्वरोद्देशेनैवविघ्नवैगुण्याद्यसंभवात् किंचअस्यधर्मस्यस्वल्पमप्युपक्रममात्रमपिकृतंमहतोभया
त्संसारात्त्रायतेरक्षति नतुकाम्यकर्मवत्किंचिद्वैगुण्यादिनानैष्फल्यमस्यत्यर्थः ४० कुतइत्यपेक्षायामु
भयोर्वैषम्यमाह व्यवसायेति इहइश्वराराधनलक्षणेकर्मयोगेव्यवसायात्मिकापरमेश्वरभक्त्यैवधुवंतरिष्या

नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात् ४०
व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन बहुशाखाह्यनंताश्चबुद्धयोव्यवसायिना ४१

मीतिनिश्चयात्मिकाएकैवैकवैकनिष्ठैवबुद्धिर्भवति अव्यवसायिनांतुबहिर्मुखानांकामिनांकामानामानं
त्यादनंतास्तत्रापिहिकर्मफलगुणफलादिप्रकारभेदातबहुशाखाश्चबुद्धयोभवंति इश्वराराधनार्थेहिनि
त्यनैमित्तिकंकर्मकिंचिदंगवैगुण्येनापिननश्यति यथाशक्यात्तथाकुर्यादितिहितद्विधीयतेनचवैगुण्य
मपिइश्वरोद्देशेनैववैगुण्यापरमात्ननतुतथाकाम्यंकर्मअतोमहद्वैषम्यमितिभावः ४१ रामरामराम

ननु कामिनोपि कष्टानुष्ठिनाद्यव्यवसायात्मिका मेव बुद्धिः किं वै कुर्वीतिं तत्राह यामिमामिति पुष्पितां विषलतावदापातरमणीयां प्रकृष्टां पारर्थ्यफलपरामेव वदंति वाचं स्वर्गादिफलश्रुतिं तेषां तया वाचापहृतचेतसां व्यवसायात्मिका बुद्धिर्न विधीयत इति तृतीयेनैवान्वयः किमिति तथा वदंति यत अविपश्चितो मूढास्तत्र हेतुः वेदे ये वादाः अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोमममृता अभूमत्याद्यास्ते ष्वेव रताः प्रीताः अत एवातः परमन्यदीश्वरतत्त्वं प्राप्यं नास्तीति वदनशीलाः ४२ कामात्मान इति अत एव कामात्मनः कामाकुलचित्ताः

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वादिनः ४२ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ४३ भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ४४

अतः स्वर्ग एव परः पुरुषार्थो येषां ते जन्म च तत्र कर्माणि च तत्फलानि च प्रददातीति तथा तां भोगैश्वर्ययोर्गतिं प्राप्तिं प्रति साधनभूता ये क्रियाविशेषास्ते बहुला यस्यां तां प्रवदंतीत्यनुषंगः ४३ ततश्च भोगैश्वर्यप्रसक्तानामिति भोगैश्वर्ययोः प्रसक्तानां अभिनिविष्टानां तया यथोक्तया वाचापहृतमाकृष्टं चेतो येषां समाधिश्चित्तैकाग्र्यं परमेश्वरैकाग्र्याभिमुखत्वं तस्मिन्न निश्चयात्मिका बुद्धिर्न विधीयते रामराम

गी० ननु यदि स्वर्गादिकं परमं फलं न भवति तर्हि किमिति वेदैस्तत्साधनतया कर्माणि विधीयंते तत्राह त्रैगुण्येति त्रिगुणा
१७ त्मकाः सकामा ये अधिकारिणस्तद्विषया स्तेषां कर्मफलसंबंधप्रतिपादका वेदाः त्वं तु निस्त्रैगुण्यो निष्कामो भव तत्रो
पायमाह निर्द्वंद्वः सुखदुःखशीतोष्णादियुगलानि द्वंद्वानि तद्रहितो भव ततो निःसत्त्वस्थेत्यर्थः कथमित्यत आह नि
17 त्यसत्त्वस्थः सन् धैर्यमवलंबस्वेत्यर्थः तथा निर्योगक्षेमः अप्राप्तस्वीकारो योगः प्राप्तपरिपालनं क्षेमः तद्रहितः आत्मवानप्र
प्रमत्तः नहि द्वंद्वाकुलस्य योगक्षेमव्यापृतचित्तस्य च प्रमादिनस्त्रैगुण्यातिक्रमः संभवतीति ४५ ननु वेदोक्ताना
नाफलपरित्यागेन निष्कामतयेश्वराराधनविषया व्यवसायात्मिका बुद्धिः कुबुद्धिरेव स्यादित्याशंक्याह यावानर्थ इति

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ४५

यावानर्थ उदपाने सर्वतः संप्लुतोदके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६

उदकं पीयते तस्मिन्निति तु उदपानं वापीकूपादि तस्मिन् स्वल्पोदके एकत्र कृत्स्नस्यार्थस्यासंभवात् तत्र परिभ्रमणेन वि
भागशो यावान् स्नानपानादिरर्थः प्रयोजनं भवति तावान्सर्वोप्यर्थः सर्वतः संप्लुतोदके महाह्रदे एकत्रैव यथा भव
ति एवं यावान्सर्वेषु वेदेषु तत्कर्मफलरूपोर्थः तावान्सर्वोपि विजानतो व्यवसायात्मिकबुद्धियुक्तस्य ब्राह्मणस्य
भवत्येव ब्रह्मानंदे क्षुद्रानंदानामंतर्भूतत्वात् एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजी राम
वंतीति श्रुतेः तस्मादियमेव सुबुद्धिरित्यर्थः ४६ १७

तर्हि सर्वकर्मफलानि परमेश्वराराधनादेव भविष्यंतीत्यभिसंधाय प्रवर्तेतेत्याशंक्याह कर्मण्येवेति तव तत्वज्ञा
नार्थिनः कर्मण्येवाधिकारः तत्फलेषु बंधहेतुषु नध्विकारः कामो मास्तु ननु कर्मणि कृते तत्फलं स्यादेव भो
जनेकृते तृप्तिवदित्याशंक्याह माकर्मफलहेतुर्भूः कर्मफलं प्रवृत्तिहेतुर्यस्य तथाभूतो माभूः कामितस्यैव स्वर्गा
देर्नियोज्यविशेषणत्वेन फलत्वादिभाव अतएवकर्मफलं बंधकं भविष्यतीति भयात् अकर्मणि कर्माकरणे

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ४७ योग
स्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ४८

तेऽभिनिष्ठा मास्तु ४७ किं तर्हि योगस्थाइति योगः परमेश्वरपरता तत्र स्थितः कर्माणि कुरु तथा संगं कर्तृत्वा
भिनिवेशं त्यक्त्वा केवलमीश्वराश्रयेणैव कुरु तत्फलस्यापि ज्ञानस्यापि सिद्ध्यसिद्ध्योः समो भूत्वा केवलमी
श्वराराधनैनैव कुरु यत एवं भूतं समत्वमेव योग उच्यते सद्भिश्चित्तसमाधा नरूपत्वात् ४८ राम राम

काम्यं तु कर्मातिनिकृष्टमित्याह दूरेणेति बुद्ध्या व्यवसायात्मिकया कृतः कर्मयोगो बुद्धियोगः बुद्धिसाधनभूतो वात
स्मात्सकाशादन्यत्काम्यं कर्म दूरेणावरमत्यंतमपकृष्टं हि जस्मादेवं तस्माद्बुद्धौ ज्ञाने शरणमाश्रयं कर्मयोगमन्विछा
नतिष्ठ यद्वा बुद्धौ शरणं त्रातारमीश्वरमाश्रयेत्यर्थः फलहेतवस्तु समानराः कृपणा दीनाः यो वा एतदक्षरमविदि
त्वा गार्ग्यस्माल्लोकान्प्रैति स कृपण इति श्रुतेः ४९ बुद्धियोगयुक्तस्तु श्रेष्ठ इत्याह बुद्धियुक्त इति सुकृतं स्वर्गं तस्व
र्गादिप्रापकं दुःकृतं निरयप्रापकं ते उ इहैव जन्मनि परमेश्वरप्रसादेन जहाति त्यजति तस्माद्योगाय तदर्थाय कर्म

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ शरणमन्विछ कृपणाः फलहेतवः ४९ बुद्धियुक्तो ज
हातीह उभे सुकृतदुष्कृते तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलं ५० कर्मजं बुद्धियुक्ता
हि फलं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं ५१

योगाय युज्यस्व घटस्व यतो योगः कर्मसु कौशलं यद्बंधकानामपि तेषामीश्वराराधनेन मोक्षपरत्वसंपादनचा
तुर्यं स एव योगः ५० कर्मणां मोक्षसाधनत्वप्रकारमाह कर्मजमिति कर्मजं फलं त्यक्त्वा केवलमीश्वरारा
धनार्थं कर्म कुर्वाणाः मनीषिणो ज्ञानिनो भूत्वा जन्मरूपेण बंधेन विनिर्मुक्ताः संतः अनामयं सर्वोपद्रवरहितं
विष्णोः पदं मोक्षाख्यं गच्छति ५१

कदीतत्पदमहंप्राप्स्यामीत्यपेक्षायामाह यदेतिभ्यां मोहो देहादिष्वात्मबुद्धिस्तदेव कलिलं गहनं विदुरित्यभिधानंतत
श्चायमर्थः एवपरमेश्वराराधनेनक्रियमाणोपदांतत्प्रसादेनतवबुद्धेर्देहाभिमानलक्षणंमोहमयंगहनंदुर्गंविशे
षेणअतितरिष्यति तदाश्रोतव्यस्यचार्थस्यनिर्वेदंगंतासि प्राप्स्यसितयोरनुपादेयत्वेनजिज्ञासांनकरिष्य
सीत्यर्थः ५२ ततश्च श्रुतिविप्रतिपन्नेति श्रुतिभिर्नानालौकिकवैदिकार्थश्रवणैर्विप्रतिपन्नाश्रुता:

यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच ५२ श्रु
तिविप्रतिपन्नातेयदास्थास्यतिनिश्चला समाधावचलाबुद्धिस्तदायोगमवाप्स्यसि ५३

पूर्वंविक्षिप्तासतीतवबुद्धिर्यदासमाधौस्थास्यति समाधीयतेचित्तमस्मिन्निति समाधिः परमेश्वरः तस्मिन्
निश्चलविषयांतरैरनाकृष्टाअतएवअचलाअभ्यासपटुत्वेनतत्रैवस्थिराएवंसतितदायोगंयोगफलंतत्वज्ञानम
वाप्स्यसि ५३

पूर्वश्लोकाकांक्ष्यात्मतत्त्वज्ञस्यलक्षणंजिज्ञासुरर्जुनउवाच स्थितेति स्वाभाविकेसमाधौस्थितस्याऽतएवस्थिता
निश्चलाप्रज्ञाबुद्धिर्यस्यतस्यकाभाषालक्षणमितियावत् केनलक्षणेनस्थितप्रज्ञउच्यतेइत्यर्थः तथास्थित
धीःकथंभाषमासनंवृजनंचकुर्यादित्यर्थः ५३ अत्रचसाधककस्ययानिज्ञानसाधनानितामेवस्वाभा
विकानिसिद्धस्यलक्षणानिअतःसिद्धस्यलक्षणानिकथयन्नेवांतरंगानिज्ञानसाधनान्याह यावध्यायस

अर्जुनउवाच स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेशव स्थितधीःकिंप्रभाषेतकिमासीतव्रजे
तकिं ५३ श्रीभगवानुवाच प्रजहातियदाकामान्सर्वान्पार्थमनोगतान् आत्मन्येवात्मनातुष्टः
स्थितप्रज्ञस्तदोच्यते ५४ दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः वीतरागभयक्रोधःस्थितधीर्मुनिरु
च्यते ५५

माप्तिःतत्रप्रथमप्रश्नोत्तरंप्रजहातीत्याभ्यां श्रीभगवानुवाच मनसिस्थितानकामानयदाप्रकर्षेणजहाति
त्यागेहेतु आत्मन्यवस्वस्मिन्नेवपरमानंदरूपेआत्मन्मेदवयमेवतुष्टतिस्तीति आत्मारामःसन्यदादृद्रवि
षयाभिलाषास्त्यजति तदातेनलक्षणेनमुनिःस्थितप्रज्ञइत्युच्यतेइत्यर्थः ५४ किंचदुःखेष्विति दुःखेषुप्राप्तेष्वपि अनु
द्विग्नमक्षुभितंमनोयस्यसः सुखेषुविगतास्पृहायस्यसः तत्रहेतुः वीतागतारागभयक्रोधायस्मात्तत्ररागःप्रीतिःसमु

सितधीःकिंप्रभाषेतेत्यस्योत्तरमाह यइतियःसर्वत्रपुत्रमित्रादिष्वपिअनभिस्नेहःस्नेहशून्यः अतएवबाधितानुव
त्वात तच्छुभमनुकूलंप्राप्यनाभिनंदतिनप्रशंसति अशुभंप्रतिकूलंप्राप्यनद्वेष्टिननिंदतिकिंतुकेवलमुदासी
नएवभाषते तस्यप्रज्ञाप्रतिष्ठितेत्यर्थः ५७ किंचयदेति यदाचायंयोगींद्रियार्थेभ्यःशब्दादिभ्यःसका
शादिंद्रियाणिसंहरतेप्रतिष्ठितेत्यर्थः अनायासेनसंहरेदष्टांतः अंगानिकरचरणादीतिकूर्मोयथास्वभावे
नैवाकर्षतितद्वत् ५८ ननुनेंद्रियाणांविषयेष्वप्रवृत्तिःस्थितप्रज्ञस्यलक्षणंभवितुमर्हतिजडानामातुराणामुपवास

यःसर्वत्रानभिस्नेहस्तत्तत्प्राप्यशुभाशुभं नाभिनंदतिनद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता ५७ यदा
संहरतेचायंकूर्मोगानीवसर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ५८ विषयाविनिव
र्तंतेनिराहारस्यदेहिनः रसवर्जंरसोप्यस्यपरंदृष्ट्वानिवर्तते ५९

पराणांचविषयेष्वप्रवृत्तेरविशेषात्तत्राह विषयाइतिइंद्रियैर्विषयाणामहरणमाहारःनिराहारस्येंद्रियैर्वि
षयग्रहणमकुर्वतोदेहिनोदेहाभिमानिनोऽज्ञस्यविषयाविनिवर्तंतेदतुभवोनिवर्त्तंतइत्यर्थःकिंतुरसोरागोभिलाष
स्तद्वर्जमभिलाषस्तुननिवर्ततइत्यर्थःरसोपिरागोपिपरंपरमात्मानंदृष्ट्वास्यस्थितप्रज्ञस्यसतोनिवर्ततेनश्यती
त्यर्थः यद्वानिराहारस्योपसपरस्यविषयाःप्रायशोनिवर्तंतेक्षुधासंतप्तस्यशब्दस्पर्शादिष्वपेक्षाभावात्परं
तुरसवर्जंरस्यापेक्षातुननुवर्ततेइत्यर्थःशेषसमानं ५९

गी० इंद्रियसंयममविनातुस्थिताप्रज्ञतानसंभवति अतःसाधकावस्थायांतत्रमहान्प्रयत्नःकर्त्तव्यइत्याहयततोहीतिद्वाभ्यां
२० यततोमोक्षेप्रयतमानस्यापिविपश्चितोविवेकिनोपिमन इंद्रियाणिप्रसभंबलाद्धरंतियतःप्रमाथीनिप्रमथनशी
20 लानिक्षोभकानि ६० यस्मादेवंतस्मात्तयुक्तोयोगीतानिइंद्रियाणिसंयम्यमत्परःसन्नासीत यस्यवशेवश
र्त्तीनिएतेनकथमासीतेतिप्रश्नस्यवशीकृतेंद्रियःसन्नासीतेतिउत्तरमुक्तंभवति ६१ बाह्येंद्रियसंयमाभावेदो

यततोह्यपिकौंतेयपुरुषस्यविपश्चितः इंद्रियाणिप्रमाथीनिहरंतिप्रसभंमनः ६० तानिसर्वाणिसंय
म्ययुक्तआसीतमत्परः वशेहियस्येंद्रियाणितस्यप्रज्ञाप्रतिष्ठिता ६१ ध्यायतोविषयान्पुंसःसंगस्तेषू
पजायते संगात्संजायतेकामः कामात्क्रोधोभिजायते ६२ क्रोधाद्भवतिसंमोहः संमोहात्स्मृतिवि
भ्रमः स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति ६३

षमुक्त्वामनःसंयमाभावेदोषमाहध्यायतइतिद्वाभ्यां गुणबुद्ध्याविषयान्ध्यायतःपुरुषस्यतेषुसंगआसक्तिः
भवति आसक्त्याचतेष्वधिकःकामोभवति कामाच्चकेनचित्प्रतिहतात्क्रोधोभवति ६१ किंचक्रोधादिति
क्रोधात्संमोहःकार्याकार्यविवेकाभावः ततःशास्त्राचार्योपदिष्टार्थस्मृतेर्विभ्रमोविचलनंविभ्रंशः ततोबुद्धेश्चे राम
तनायाविनाशः वृक्षादिष्विवाभिभवः ततःप्रणश्यतिमृततुल्योभवति ६३
२०

नुन इंद्रियाणां विषयप्रवणस्वभावनां निरोद्धुमशक्यत्वात् अयं दोषः परिहृत इति स्थितप्रज्ञत्वं कथं स्यादित्याशंक्याह
रागेति द्वाभ्यां रागद्वेषरहितैर्विगतदर्पैरिंद्रियैर्विषयांश्चरन्नुपभुंजानोपि प्रसादं शांतिं प्राप्नोति रागद्वेषराहित्यमेवा
ह आत्मनो मनसो वश्यैर्विधेयो वशवर्ती आत्मा मनो यस्येति अनेनैव कथं व्रजेत भुंजीतेत्यस्य चतुर्थप्रश्नस्य आधी
नैरिंद्रियैर्विषयानधिगच्छतीत्युत्तरमुक्तं भवति ६४ प्रसादे सति किं स्यादित्यत्राह प्रसाद इति प्रसादे सति
सर्वदुःखनाशः ततश्च प्रसन्नचेतसो बुद्धिः प्रतिष्ठिता भवतीत्यर्थः ६५ इंद्रियनिग्रहस्य स्थितप्रज्ञतासाध

रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ६४ प्र
सादे सर्वदुःखानां हानिरस्योपजायते प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ६५ नास्ति बुद्धि
रयुक्तस्य न चायुक्तस्य भावना न चाभावयतः शांतिरशांतिरशांतस्य कुतः सुखं ६६

नत्वं व्यतिरेकमुखेनोपपादयति नास्तीति अयुक्तस्यावशीकृतेंद्रियस्य नास्ति बुद्धिः शास्त्राचार्योपदेशाभ्यां आत्म
विषया बुद्धिः प्रज्ञैव नोत्पद्यते कुतस्तस्याः प्रतिष्ठितावार्ता कुत इत्यत आह न चायुक्तस्य भावना ध्यानं भावन
याहि बुद्धेरात्मनि प्रतिष्ठा भवति सा चायुक्तस्य नास्ति न चाभावयतः अकृतध्यानमकुर्वतः शांतिः आत्मनि चित्तो
परतिः अशांतस्य च कुतः सुखं मोक्षानंद इत्यर्थः ६६

नास्तिबुद्धिरयुक्तस्येत्यत्र हेतुमाह इंद्रियाणामिति इंद्रियाणामवशीकृतानां स्वैरं विषयेषु चरतां मध्ये यदेवैकं
मिंद्रियं मनः अनुविधीयते अवशीकृतं सत् इंद्रियेण सह गच्छति तदेवेंद्रियमस्य मनसः पुरुषस्यावाप्र
ज्ञां बुद्धिं हरति विषयविक्षिप्तां करोति किमुत वक्तव्यं बहूनि प्रज्ञां हरंतीति यथा प्रमत्तस्य कर्णधारस्य नावं

इंद्रियाणां हि चरतां यन्मनोनुविधीयते तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ६७ त
स्माद्यस्य महाबाहो निगृहीतानि सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ६८

वायुः समुद्रे सर्वतः परिभ्रमयति तद्वत् ६७ इंद्रियसंयमस्य स्थितप्रज्ञत्वे साधनत्वं लक्षणत्वं चोक्तमुपसंह
रति तस्माद्यस्येति तस्य प्रज्ञा प्रतिष्ठितेत्यस्यार्थः लक्षणत्वोपसंहारे तस्य प्रज्ञा प्रतिष्ठिता ज्ञातव्या इत्यर्थः
महाबाहो इति संबोधयन् महति वैरिनिग्रहे समर्थस्य तवात्रापि सामर्थ्यं भवेदिति सूचयति ६८

ननु च न कश्चिदपि प्रसुप्त इव दर्शनादिव्यापारशून्यः सर्वात्मना निगृहीतेंद्रियो लोके दृश्यते अतोऽसंभावितमिदं ल
क्षणमित्याशंक्याह यानिशेति सर्वेषां भूतानां या निशा निशेव निशा आत्मनिष्ठा आत्माज्ञानध्वांतावृतमतीनां
तस्यां दर्शनादिव्यवहाराभावात् तस्यामात्मनिष्ठायां संयमी निगृहीतेंद्रियो जागर्ति प्रबुध्यते यस्यां तु विषय
निष्ठायां भूतानि जाग्रति प्रबुध्यंते सात्मतत्त्वं पश्यतो मुनेर्निशा तस्यां तद्दर्शनादिव्यापारस्तस्य नास्तीत्यर्थः
एतदुक्तं भवति यथा दिवान्धानामुलूकादीनां रात्रावेव दर्शनं न तु दिवसे एवं ब्रह्मज्ञस्योन्मीलिताक्षस्यापि ब्रह्मण्येव दृष्टि

यानिशा सर्वभूतानां तस्यां जागर्ति संयमी यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ६९ आपूर्य
माणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामका
मी ७० विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः निर्ममो निरहंकारः स शांतिमधिगच्छति ७१

र्न तु विषयेष्वतो नासंभावितमिदं लक्षणमिति ६९ ननु विषयेषु दृष्ट्यभावे कथमसौ तान्भुंक्ते इत्यपेक्षा
यामाह आपूर्यमाणमिति नानानदीभिरापूर्यमाणमपि अचलप्रतिष्ठमनतिक्रांतमर्यादमेव समुद्रं पुनरपि
अन्या आपो यथा प्रविशंति तथा कामा विषया यं मुनिं अंतर्दृष्टिं भोगैरविक्रियमाणमेव प्रारब्धकर्मभिराक्षिप्ताः सन्तः
प्रविशंति स शांतिं कैवल्यं प्राप्नोति न तु कामकामी भोगकामनाशील ७० यस्मादेवं तस्माद्विहायेति प्राप्तान्कामान्
विहाय तेष्वप्यप्राप्तेषु च निःस्पृहः यतो निरहंकारः अत एव तद्भोगसाधनेषु निर्ममः सन्नंतर्दृष्टिः भूत्वा य
श्चरति प्रारब्धवशेन भोगान्भुंक्ते यत्र क्वापि गच्छतीति वा स शांतिं प्राप्नोति ७१

गी०
२२
22

उक्तां ज्ञाननिष्ठां स्तुवन्नुपसंहरति एषेति ब्राह्मी स्थितिर्ब्रह्मज्ञाननिष्ठा एवंविधाणां परमेश्वराराधनेन विशुद्धात: का
रणः पुमान् प्राप्य न मुह्यति पुनः संसारमोहं न प्राप्नोति यतः अंतकालेप्यस्तु समयेपि अस्यां क्षणमात्रं स्थित्वा ब्रह्म
निर्वाणमृच्छति प्राप्नोति किं पुनर्वक्तव्यं बाल्यमारभ्य स्थित्वा प्राप्नोतीति ७२ इति श्रीसुबोधिन्यां टीकायां द्विती
याध्यायः ॥ ॐ शोकपंकनिमग्नं यः सांख्ययोगोपदेशतः उज्जहारार्जुनं भक्तं स कृष्णः शरणं मम एवं तावदशोच्यानन्व
शोचस्त्वमित्यादिनाध्यायेन मोक्षसाधनत्वेन देहात्मविवेकबुद्धिरुक्ता तदनंतरं एषा तेभिहिता सांख्ये बुद्धिर्यो

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाणमृच्छति ७२ इति श्री
भगवद्गीतासूपनिःसत्सु ब्रह्मविद्यायां सांख्ययोगो नाम द्विः अर्जुन उवाच ज्यायसी चेत्कर्मणस्ते
मता बुद्धिर्जनार्दन तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १

गे त्विमां शृणु इत्यादिना कर्म चोक्तं न च तयोर्गुणप्रधानभावः स्पष्टं दर्शितः तत्र बुद्धियुक्तस्य स्थितप्रज्ञस्य नि
ष्कामत्वनियतेंद्रियत्वनिरहंकारत्वाद्यभिधानात् एषा ब्राह्मी स्थितिः पार्थेति सप्रशंसमुपसंहाराच्च बुद्धिकर्मणोर्म
ध्ये बुद्धिः श्रेष्ठा भगवतोभिमतेति मत्वानोर्जुन उवाच ज्यायसीति कर्मणः सकाशान्मोक्षांतरंगत्वेन बुद्धिर्ज्यायसी अधि
कतरा श्रेष्ठा चेत्तव संमता तर्हि किमर्थं तस्माद्युध्यस्वेति तस्मादुत्तिष्ठेति च वारं वारं वदन् घोरे हिंसात्मके कर्मणि मां राम
नियोजयसि प्रवर्तयसि १ राम राम राम राम २२

ननु धर्म्माद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यत इत्यादिना कर्मणोऽपि श्रेष्ठत्वमुक्तमेवेत्याशंक्याह व्यामिश्रेणेति क्वचित्कर्म प्रशंसा क्वचिज्ज्ञानप्रशंसा एवं व्यामिश्रं संदेहोत्पादकमिव यद्वाक्यं तेन मे बुद्धिं मतिमुभयत्र दोलायितां कुर्वन्मोहयसीव परम कारुणिकस्य तव मोहकत्वं नास्त्येव तथापि भ्रान्त्या मम मैवमाभाति अतस्तयोर्मध्ये एकम्‌ इदं तदेकं निश्चित्य वदेति यद्वा अहमिदमेव श्रेयः साधनमिति निश्चित्य येनानुष्ठितेन श्रेयो मोक्षमवाप्नुयां प्राप्स्यामि तदेकं वद २ अत्रोत्तरं श्रीभगवानुवाच लोकेस्मिन्निति अयमर्थः यदि मया परस्परं निरपेक्षं मोक्षसाधनत्वेन कर्मज्ञानयोगरूपं निष्ठाद्वयमुक्तं स्यात् तर्हि द्वयोर्मध्ये यद्भद्रं तदेकं वदेति त्वदीयप्रश्नः संगच्छेत मनुमयातथोक्तं किंतु द्वाभ्यामेकैव ब्रह्मनिष्ठा उक्ता गुणप्रधानभूतयोस्तयोः स्वातंत्र्या

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं वद निश्चित्य येन श्रेयोहमाप्नुयाम्‌ २ श्रीभगवानुवाच लोकेस्मि न्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्‌ ३

नुपपत्तेः एकस्या एव तु पुकारभेदमात्रमधिकारिभेदेनोक्तमिति अस्मिन्‌ शुद्धातःकरणतया द्विविधे लोके अधिकारिजने द्विविधेप्रकारेयस्याः सा द्विविधा निष्ठा मोक्षपरता पुरा पूर्वाध्याये मया सर्वज्ञेन प्रोक्ता स्पष्टमेवोक्ताप्रकारद्वयमेव निर्दिशति सांख्यानां शुद्धान्तःकरणानां ज्ञानभूमिकामारूढानां ज्ञानपरिपाकार्थं ज्ञानयोगेन ध्यानादिना निष्ठा ब्रह्मपरता उक्ता तानि सर्वाणि संयम्य युक्त आसीत मत्पर इत्यादिना सांख्यभूमिकामारूढानां तु अन्तःकरणशुद्धिद्वारा तदारोहतदुपायभूतकर्मयोगाधिकारिणां योगिनां कर्मनिष्ठोक्ता धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यत इत्यादिना अत एवचित्तशुद्ध्यशुद्धिरूपावस्थाभेदेन द्विविधापि निष्ठोक्ता एषातेभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु इत्यादिना ३ रामराम रामराम

अतःसम्यकचित्तशुध्याज्ञानोत्पत्तिपर्यन्तं वर्णाश्रमोचितानि कर्माणि कर्त्तव्यानि अन्यथाचितशुध्यभोपेरित्याह नकर्म
णामिति. कर्मणामनारंभादननुष्ठानान्नैष्कर्म्यं ज्ञानं नाश्नुते न प्राप्नोति ननु च शास्त्रमेव प्रव्राजिनो लोकमीप्संतः
प्रव्रजंतीति सन्यासस्य मोक्षाङ्गत्वमिति श्रुतेः सन्यासादेव मोक्षो भविष्यति किं कर्मभिरित्याशंक्योक्तम् न च चित्त
शुद्धिं विना कृतात् सन्यासादेव ज्ञानशून्यात्सिद्धिं मोक्षं समधिगच्छति ४ कर्मणां च संन्यासः तेष्वनासक्तिमा

न कर्मणामनारंभान्नैःकर्म्यं पुरुषोऽश्नुते न च संन्यासनादेव सिद्धिं समधिगच्छति ४ न हि कश्चित्क्ष
णमपि जातु तिष्ठत्यकर्मकृत कार्य्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ५

त्रं न तु स्वरूपेण त्यक्तुमशक्यत्वादित्याह न हीति जातु कदाचित् कस्यांचिदवस्थायां क्षणमात्रमपि कश्चि
दपि ज्ञानी वाज्ञो वा अकर्मकृत् कर्माण्यकुर्वाणो न तिष्ठति तत्र हेतुः प्रकृतिजैः स्वभावप्रभवैः रागद्वेषादि
भिर्गुणैः सर्वोपि जनः कर्म कार्यते कर्मणि प्रवर्त्यते अवशः अस्वतन्त्रः सन् ५ श्रीरामरारामरामरा

अतः अज्ञं कल्याणि नं निंदति कर्मेंद्रियाणीति वाक्याशपादीनि कर्मेंद्रियाण्यपि निगृह्य यो मनसा भगवद्ध्यानछलेन इ
द्रियार्थान् विषयान् स्मरन्नास्ते अविशुद्धतया मनसा आत्मनि स्थैर्याभावात् स मिथ्याचारः कपटाचारो दांभिक उच्य
ते इत्यर्थः ६ एतद्विपरीतकर्मकर्ता श्रेष्ठ इत्याह यस्त्विति यस्तु ज्ञानेंद्रियाणि मनसा नियम्य ईश्वरप्रवणानि कृ
त्वा कर्मेंद्रियैः कर्मरूपं योगमुपायमारभते अनुतिष्ठति असक्तः फलाभिलाषरहितः स तु स विशिष्यते विशि

कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् इंद्रियार्थान्विमूढात्मा मिथ्याचारः सः उच्यते ६ यस्त्विंद्रिया
णि मनसा नियम्यारभतेऽर्जुन कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ७ नियतं कुरु कर्म त्वं कर्म ज्यायो
ह्यकर्मणः शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ८

ष्यते विविशिष्टो भवति चित्तशुद्ध्या ज्ञानवान् भवतीत्यर्थः ७ यस्मादेवं तस्मात् नियतमिति नियतं नित्यकर्म
संध्योपासनादि कुरु हि यस्मात् अकर्मणः अकरणात् तस्सकाशात् कर्म ज्यायः अधिकं श्रेष्ठं अन्यथा अकर्मिणः
सर्वकर्मशून्यस्य तव शरीरनिर्वाहोऽपि न प्रसिद्ध्येत् न भवेत् ८ राम कृष्ण रामराम कृष्ण राम

सांख्यास्तु सर्वमपि कर्म बंधकत्वान्न कार्यमित्याहुः तन्निराकुर्वन्नित्याह यज्ञार्थादिति यज्ञोत्र विष्णुः यज्ञो वै विष्णु
रिति श्रुतेः तदाराधनार्थात्कर्मणोन्यत्र तदेकं विनायं लोकः कर्मबंधनः कर्मबंधनः कर्मभिर्बध्यते नत्वीश्वरारा
धनार्थेनेति अतस्तदर्थं विष्णुप्रीत्यर्थं मुक्तसंगो निःकामः सन् कर्म समाचर एवं प्रजापतिवचनादपि क
र्मकर्तव्यविशिष्टं इत्याह सहयज्ञा इति चतुर्भिः यज्ञेन सह वर्तंत इति सहयज्ञाः यज्ञाधिकृताः ब्राह्मणाद्याः प्रजाः पुरा
सर्गादौ सृष्ट्वा ब्रह्मेदमुवाच अनेन यज्ञेन प्रसविष्यध्वं प्रभूयध्वं प्रसवो वृद्धिः उत्तरोत्तरामभिवृद्धिं लभध्वमित्यर्थः

यज्ञार्थात्कर्मणोन्यत्र लोकोयं कर्मबंधनः तदर्थं कर्म कौंतेय मुक्तसंगः समाचर ९ सहयज्ञाः प्रजास
सृष्ट्वा पुरोवाच प्रजापतिः अनेन प्रसविष्यध्वमेष वोस्त्विष्टकामधुक् १० देवान्भावयतानेन ते देवा भा
वयंतु वः परस्परं भावयंतः श्रेयः परमवाप्स्यथ ११

तत्र हेतुः एष यज्ञो वो युष्माकं इष्टकामधुक् इष्टान् कामान् दोग्धीति तथाऽभीष्टभोगप्रदोस्त्वित्यर्थः अत्र च य
ज्ञग्रहणं आवश्यककर्मोपलक्षणार्थं काम्यकर्मप्रशंसा तु प्रकरणेऽसंगतापि सामान्यतोऽकर्मणः कर्म श्रेष्ठमि
त्येतदर्थं १० कथमिष्टकामदोग्धा यज्ञो भवेदित्यत आह देवानिति अनेन यज्ञेन यूयं देवान् भावयत हविर्भागैः
संवर्धयत ते च देवा युष्मान् वर्धयंतु एवमन्योन्यं संवर्धयंतो देवाश्च यूयं च परस्परं श्रेयः अभीष्टमर्थं प्राप्स्यंतु ११

एतदेवस्पष्टीकुर्वन्नकर्माकरणेदोषमाह इष्टानिति यज्ञैर्भाविताःसंतोदेवावृष्ट्यादिद्वारेणवःयुष्मभ्यंइष्टान्भो
गान्दास्यंतिहि अतोदेवैर्दत्तान्अन्नादीन्अन्नादीनेभ्योदेवेभ्यःपंचयज्ञादिभिरदत्वायोभुंक्तेसतुचौरएवज्ञेयः
अतश्चयजंतएतश्रेष्ठानेतरइत्याह यज्ञशिष्टेतिवैश्वदेवादियज्ञावशिष्टमन्नंयेऽश्नंतितेपंचसूनाकृतैःसर्वैः
किल्बिषैर्मुच्यंते पंचसूनाःस्मृतौउक्ताः कंडनीपेषणीचुल्लीउदकुंभीचमार्जनी पंचसूनागृहस्थस्यताभिस्स्वा

इष्टान्भोगान्हिवोदेवादास्यंतेयज्ञभाविताः तैर्दत्तानप्रदायैभ्योयोभुंक्तेस्तेनएवसः १२ यज्ञशिष्टाशिनः
संतोमुच्यंतेसर्वकिल्बिषैः भुंजंतेतेत्वघंपापायेपचंत्यात्मकारणात् १३ अन्नाद्भवंतिभूतानिपर्ज
न्यादन्नसंभवः यज्ञाद्भवतिपर्जन्योयज्ञःकर्मसमुद्भवः १४

र्गंनविंदति येत्वात्मनोभोजनार्थमेवपचंति नतुवैश्वदेवाद्यर्थंतेपापादुराचाराअघमेवभुंजंते १३ जगच्चक्र
प्रवृत्तिहेतुत्वादपिकर्मकर्तव्यमित्याह अन्नादितित्रिभिः अन्नात् शुक्रशोणितरूपेणपरिणताद्भूतान्युत्पद्यं
ते अन्नस्यचसंभवःपर्जन्याद्वृष्टेः सचपर्जन्योयज्ञाद्भवति सचयज्ञःकर्मसमुद्भवः कर्मणायजमानादिव्यापारेणस
म्यगनिष्पद्यतःइत्यर्थः अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइत्यादिस्मृतेः
१४

तथाकर्मोत्पत्तिश्च कर्म यजमानादिव्यापाररूपं ब्रह्मोद्भवं विद्धि ब्रह्म वेदस्तस्मात्प्रवृत्तमुद्भूतं जानीहि तच्च ब्रह्म वेदाख्यमक्षरा
त्परब्रह्मणः समुद्भूतं विद्धि अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेद इति श्रुतेः यत एवमक्षरादेव
यज्ञप्रवृत्तिः अतस्तस्याभिप्रेतो यज्ञः तस्मात्सर्वगतमप्यक्षरं ब्रह्म नित्यं सर्वदा यज्ञे प्रतिष्ठितं यज्ञेनोपायभू
तेन प्राप्यत इति यज्ञे प्रतिष्ठितमुच्यते उद्यमस्यासदालेदमीशितियावत् यद्वा यस्माज्जगच्चक्रमूलं कर्म तस्मा
त्सर्वगतं मन्त्रार्थवादैः सर्वेषु भुताख्याख्यानादिषु गतं स्थितमपि वेदाख्यं ब्रह्म सर्वदा यज्ञे तात्पर्ये

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं १५ एवं
प्रवर्तितं चक्रं नानुवर्तयतीह यः अघायुरिन्द्रियारामो मोघं पार्थ स जीवति १६

ण प्रतिष्ठितं अतो यज्ञादिकर्म कर्तव्यमित्यर्थः १५ यस्मादेवं परमेश्वरेणैव लोकानां पुरुषार्थसिद्धये कर्मादि
चक्रं प्रवर्तितं तस्मात्तदकुर्वतो वृथैव जीवितमित्याह एवमिति परमेश्वरवाक्यभूतात् वेदाख्याद्ब्रह्मणः
पुरुषाणां कर्मणि प्रवृत्तिः ततः कर्मनिष्पत्तिः ततः पर्जन्यस्ततोऽन्नं ततो भूतानि भूतानां च पुनस्तथैव कर्मप्रवृ
त्तिरित्येवं प्रतितं चक्रं यो नानुवर्तयतिष्ठति सघायुः अघापापरूपमायुर्यस्य स यत इन्द्रियैर्विषयेष्वेवारमति न हि

तदेवं न कर्मणामनारंभादित्यादिनाऽज्ञस्यांतःकरणशुद्ध्यर्थं कर्मयोगमुक्त्वा ज्ञानिनः कर्मानुपयोगमाह यस्त्विति द्वा
भ्यां आत्मन्येव रतिः प्रीतिर्यस्य ततश्चात्मन्येव तृप्तः स्वानंदानुभवेन निर्वृतः अतएवात्मन्येवासंतुष्टो भोगापेक्षा
रहितो यस्तस्य कर्तव्यं नास्ति १७ तत्र हेतुमाह नैवेति कृतेन कर्मणा तस्यार्थः पुण्यं नैवास्ति न चाकृतेन कश्च
न कोपि प्रत्यवायोस्ति निरहंकारत्वेन विधिनिषेधातीतत्वात् तथापि तस्मा तदेषां देवानां न प्रियं यदेतन्मनुष्या वि
दुरिति श्रुतेः मोक्षे देवकृतविघ्नसंभवात् तत्परिहारार्थं कर्मभिर्देवाः सेव्या इत्याशंक्योक्तं न चेति सर्वभूतेषु ब्रह्मा

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते १७
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः १८

दिस्थावरांतेषु कश्चिदपि अर्थव्यपाश्रयः आश्रयण व्यपाश्रयः अर्थे मोक्षे आश्रयणीयोस्य नास्तीत्यर्थः विघ्नाभावस्तु
श्रुत्यैवोक्तत्वात् तथा च श्रुतिः तस्य ह न देवाश्च नाभूत्या ईशते आत्मा ह्येषां स भवतीति इत्येतस्य व्ययमप्यर्थो देवा अपि तस्या
त्मतत्वज्ञस्य अभूत्यै ब्रह्मता प्रतिबंधाय नेशते न शक्नुवंतीति श्रुतेरर्थः देवकृतास्तु विघ्नास्तस्य सम्यक् ज्ञानोत्पत्तेः प्रा
गेव यदेतद्ब्रह्म मनुष्या विदुस्तदेषां देवानां न प्रियमिति ब्रह्मज्ञानस्यैवाप्रियत्वोक्तात्तत्रैव विघ्नकर्तृत्वस्य सूचितत्वात् १८

यस्मादेवंभूतस्य ज्ञानिन एव कर्मानुपयोगो नान्यस्य तस्मात्त्वं कर्म कुर्वित्याह तस्मादिति असक्तः फलसंगरहि-
तः सन् कार्यमवश्यं कर्तव्यतया विहितं नित्यं नैमित्तिकं कर्म सम्यगाचर हि यस्मादसक्तः कर्माचरन् पुरुषः परं
मोक्षं चित्तशुद्धिज्ञानद्वारा प्राप्नोति १९ अत्र सदाचारं प्रमाणयति कर्मणैवेति कर्मणैव शुद्धसत्वाः संतः
संसिद्धिं सम्यग्ज्ञानं प्राप्ता इत्यर्थः यद्यपि त्वं सम्यग्ज्ञानिनमेवात्मानं मन्यसे तथापि कर्माचरणं भद्रमेवे-
त्याह लोकसंग्रहमिति लोकस्य संग्रहः स्वधर्मे प्रवर्तनं मया कर्मणि कृते जनः सर्वोऽपि करिष्यति अ-

तस्मादसक्तः सततं कार्यं कर्म समाचर असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः १९ कर्म-
णैव हि संसिद्धिमास्थिता जनकादयः लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि २० यद्यदा-
चरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते २१

न्यथा ज्ञानिदृष्टांतेनाऽज्ञः कर्म त्यजन्पतेदित्येवं लोकरक्षणमपि तावत्प्रयोजनं संपश्यन्कर्म कर्तुमे-
वार्हसि न तु त्यक्तुमित्यर्थः २० कर्मकरणे लोकसंग्रहो यथा स्यात्तथाह यद्यदिति इतरः प्राकृतो जनो-
ऽपि तत्तदेवाचरति स श्रेष्ठो जनः कर्मशास्त्रं वा निवृत्तिशास्त्रं वा यत्प्रमाणं मन्यते तदेव लोकोऽप्यनुसरति २१ राम
२६

अत्र चात्मैव दृष्टान्त इत्याह नमे इति त्रिभिः हे पार्थ मे कर्तव्यं नास्ति यतस्त्रिष्वपि लोकेष्वप्राप्तं संप्राप्यं नास्ति तथापि
कर्मणि वर्तेऽहं कर्म करोमीत्यर्थः २२ अकरणे लोकस्य नाशं दर्शयति यदीति जातु कदाचिदतन्द्रितोऽनलसः सन्यदि क
र्मणि न वर्तेयं कर्म नानुतिष्ठेयं तर्हि ममैव वर्त्म मार्गं मनुष्या अनुवर्तेरन्नित्यर्थः २३ ततः किमत आह उत्सीदेयुः क
र्मलोपेन नश्येयुः ततश्च वर्ण

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि २२ यदि ह्यहं न वर्तेयं जातु
कर्मण्यतन्द्रित मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः २३ उत्सीदेयुरिमे लोका न कुर्यां कर्म चे
दहं संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः २४ सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं २५

संकरो भवेत् तथाप्यहमेव कर्ता स्यां भवेयमेवं च प्रजा उपहन्यां मलिनीकुर्यां २४ तस्मादात्मविदापि लोक
संग्रहार्थं तत्कर्म यथा कर्म कार्यमित्युपसंहरति सक्ता इति सक्ता अभिनिविष्टाः सन्तः अज्ञा यथा कर्म कुर्वन्ति
असक्तः सन् विद्वानपि तथैव कुर्यात् लोकसंग्रहं कर्तुमिच्छुः २५ श्रीरामराम श्रीरामराम श्रीराम

ननु कृपया तत्वज्ञानमेवोपदेष्टुं युक्तं नेत्याह नबुद्धीति अज्ञानामतएव कर्मसंगिनां कर्मासक्तानामकर्तात्मो
पदेशेन बुद्धिभेदमन्यथात्वं नजनयेत् कर्मणः सकाशात् बुद्धिचालनं नकुर्यात् अपितु जोषयेत् सेवयेत्
अज्ञानकर्माणि कारयेदित्यर्थः कथं युक्तोऽवहितो भूत्वा स्वयमाचरन् बुद्धिचालने कृते सति कर्मसु श्रद्धा

नबुद्धिभेदं जनयेदज्ञानां कर्मसंगिनां जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् २६
प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यते॥ २७

"तव्यं तर्हि विद्वदविदुषोः को विशेष इत्याशंक्योभयोर्विशेषं दर्शयति प्रकृतेरिति द्वाभ्यां प्रकृतेर्गुणैः कार्यैरिन्द्रि
यैः सर्वप्रकारेण क्रियमाणानि यानि कर्माणि तान्यहं कर्ता करोमीति मन्यते अत्र हेतुः अहंकारेणेन्द्रि
यादिष्वात्माध्यासेन विमूढ आत्मा बुद्धिर्यस्य सः २७ राम
निवृत्तेः ज्ञानस्य चानुत्पत्तेः तेषामुभयभ्रष्टः स्यादिति भावः २६ ननु विदुषापि चेत्कर्मक रामरराम ६ २७

विद्वांस्तु तथा न मन्यते त्याह तत्त्वविदिति नाहं गुणात्मक इति गुणेभ्य आत्मनो विभागः न मे कर्माणीति कर्मभ्यो प्यात्मनो विभागस्तयोर्गुणकर्मविभागयोर्यस्तत्त्वं वेत्ति स तु न सज्जते कर्तृत्वाभिनिवेशं न करोतीति तत्र हेतुः गुणा इन्द्रियाणि गुणेषु विषयेषु प्रवर्त्तन्ते नाहमिति मत्वा २८ न बुद्धिभेदं जनयेदित्युक्तमर्थमुपसंहरति प्रकृतेरिति ये प्रकृतेर्गुणैः सत्वादिभिः संमूढाः सन्तो गुणेष्विन्द्रियादिषु तत्कर्मसु च सज्जन्ते तानकृत्स्नवि

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते २८ प्रकृतेर्गुणसंमूढाः स
ज्जन्ते गुणकर्मसु तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् २९ मयि सर्वाणि कर्माणि संन्य
स्याध्यात्मचेतसा निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ३०

दो मंदमतीन् कृत्स्नवित् सर्वज्ञो न विचालयेत् २९ तदेवं तत्त्वविदापि कर्म कर्त्तव्यं त्वं तु नाद्यापि तत्त्ववित् अतः कर्मैव कुर्वित्याह मयीति सर्वाणि कर्माणि मयि संन्यस्य समर्प्य अध्यात्मचेतसा अन्तर्याम्यधीनोऽहं करोमीति दृष्ट्या निराशीर्निष्कामः अत एव मत्कृते फलसाधनं यदं मदर्थमिदं कर्मेति एवं ममताशून्यश्च त्वा विगतज्वरः त्यक्तशोकश्च भूत्वा युध्यस्व ३०

गी०

२९ एवं कर्मानुष्ठाने गुणमाह ये मे मतमिति मद्वाक्ये श्रद्धावंतः अनसूयंतः दुःखात्मके कर्मणि प्रवर्तयतीति दो
28 षदृष्टिमकुर्वंतः च ये मदीयमिदं मतमनुतिष्ठंति ते पि शनैः सम्यक्ज्ञानिवत्कर्मभिर्मुच्यंते ३१ विपक्षे दोषमा
ह ये त्वेतदिति ये तु मे मम मतमीश्वरार्थं कर्म कर्त्तव्यमित्यनुशासनं अभ्यसूयंतो द्विषंतः येनानुतिष्ठंति ता
न् अचेतसो विवेकशून्यान् अत एव सर्वस्मिन् कर्मणि ब्रह्मविषये यत् ज्ञानं तत्र मूढान् नष्टान् विद्धि ३२

ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः श्रद्धावंतोनसूयंतो मुच्यंते तेपि कर्म्मभिः ३१ ये त्वेतदभ्य
सूयंतो नानुतिष्ठंति मे मतं सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ३२ सदृशं चेष्टते स्वा
स्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति ३३

ननु तर्हि महाफलत्वादिंद्रियाणि निगृह्य निष्कामाः संतः सर्वेपि स्वधर्ममेव किं नानुतिष्ठंति तत्राह सदृश
मिति प्रकृतिः प्राचीनकर्मसंस्काराधीनस्वभावः स्वस्याः स्वकीयायाः प्रकृतेः स्वभावस्य सदृशमनुरूपमेव गु राम
णदोषज्ञानवानपि चेष्टते किं पुनर्वक्तव्यमज्ञश्चेष्टत इति यस्मात् भूतानि सर्वेपि प्राणिनः प्रकृतिं यांति अ
नुवर्तंते एवं च सति इंद्रियनिग्रहः किं करिष्यति प्रकृतेर्बलिष्ठत्वादित्यर्थः ३३ रामरामरामरामरा २९

नन्वेवं प्रकृत्यधीनैव चेत् पुरुषस्य प्रवृत्तिस्तर्हि विधिनिषेधवैयर्थ्यं प्राप्तमित्याह इंद्रियस्येति इंद्रियस्येंद्रियस्या
र्थे इति वीप्सया प्रत्येकं सर्वेषामिंद्रियाणामित्युक्तं भवति अर्थे स्वविषये अनुकूले रागः प्रतिकूले द्वेष इत्येवं रा
गद्वेषौ व्यवस्थितौ अवश्यंभाविनौ ततश्च तदनुरूपा प्रवृत्तिर्भूतानां प्रकृतिः तथापि च तयोर्वशं प्रवः तीन भवे

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ३४

दिति शास्त्रेण नियम्यते हि यस्मात् अस्य मुमुक्षोस्तौ रागद्वेषौ परिपंथिनौ प्रतिपक्षौ अयं भावः विषयस्मरणा
दिना रागद्वेषावुत्पाद्य अनवहितं पुरुषं अनर्थेपि गंभीरस्रोत इव प्रकृतिः बलात् प्रवर्तयति शास्त्रं तु ततः प्रागेव वि
षयेषु रागद्वेषप्रतिबंधके परमेश्वरभजनादौ ततश्च गंभीरस्रोतःपातात् पूर्वमेव नावमाश्रिता इव नानार्थात् आ
प्नुवंति सर्वथा रागद्वेषौ त्याज्याविति भावः ३४

गी०
२ए

तदेवं स्वाभाविकां याश्वदिसदर्शीप्रवर्तितंपत्का धर्मेप्रवर्तितव्यमित्युक्तंतर्हिं स्वधर्मस्ययुद्धादेर्दुःखरूपस्ययथावत्क
र्तुमशक्यत्वात्परधर्मस्यचाहिंसादेः सुकरत्वात्धर्मत्वाविशेषात्अतत्रप्रवर्तितुमिच्छतिप्रत्याह श्रेयानिति किंचिं
दंगहीनोपिस्वधर्मः श्रेयान्प्रशस्ततरः स्वनुष्ठितात्सकलांगसंपूर्त्याकृतादपिपरधर्मात्तुसकाशात् तत्र
हेतुः स्वधर्मेयुद्धादौप्रवर्त्तमानस्यनिधनंमरणमपिश्रेष्ठं स्वर्गादिप्रापकत्वात्परधर्मःपरस्यभयावहः

श्रेयान्स्वधर्मोविगुणः परधर्मात्स्वनुष्ठितात् स्वधर्मेनिधनंश्रेयः परधर्मोभयावहः ३५ अर्जु
नउवाच अथकेनप्रयुक्तोयंपापंचरतिपुरुषः अनिच्छन्नपिवार्ष्णेयबलादिवनियोजितः ३६

निषिद्धत्वेननरकप्रापकत्वात् ३५ तयोर्नैवशमागच्छेदित्युक्तंतदेतदशक्यंमन्वानोर्जुनउवाच अथ
केनेति वृष्णिवंशेअवतीर्णोवार्ष्णेयस्तस्यामंत्रणोहेवार्ष्णेयानर्थरूपंपापंकर्तुमनिच्छन्नपिकेनप्रयुक्तः
प्रेरितः अयंपुरुषःपापंचरति कामक्रोधौविवेकबलेननिरुंधतोपिपुरुषस्यपुनःपापेप्रवृत्तिदर्शना राम
त्अन्योपितयोर्मूलभूतःकश्चित्प्रवर्त्तकोभवेदितिसंभावनायाप्रश्नःअर्जुनस्य ३६ रामराम॥
२ए

अनंतरं श्रीभगवानुवाच काम एष इति यस्त्वया पृष्टो हेतुः एष काम एव ननु क्रोधोऽपि पूर्वं त्वयोक्तः इंद्रियस्येंद्रियस्यार्थे इति
अत्र सत्यं न असेतताः पप्रक्ष किंतु क्रोधोप्येष एवाहिकेन चित्रयति हृतः क्रोधात्म नापरिणमते अतः पूर्वं पृथक्के
नोक्तोपि क्रोधः कामज एव क्रोधज इति अभिप्रायेण कामेनैकीकृत्योच्यते रजोगुणसंभवतीति तथा तेन सत्व
वृध्यारजसि दुर्यनीते सति कामोपि क्रीयत इति सूचितं एवं काममभिहमो दृष्ट्वा ज्ञानी वैरिणं विद्धि अयं च वक्ष्यमाणक्र
मेण हंतव्य एव येतो नासौ दानेन संधातुं शक्यते इत्याह महाशनमहद्दर्शनं यस्य स दुष्पूर इत्यर्थः न च सामनासंधा

श्रीभगवानुवाच काम एष क्रोध एष रजोगुणसमुद्भवः महाशनो महापाप्मा विद्ध्येनमिह वैरि
णं ३७ धूमेनाव्रियते वह्निर्यथादर्शो मलेन च यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतं ३८

तुं शक्यः यतो महापाप्मा अत्युग्रः यथा पापाठांतरं कामः क्रोधमयो घोरः स्तंभहर्षसमुद्भवः अहंकारोभिमानात्मा दुस्तरः
पापकर्मभिः हर्षं प्रवर्तयत्येष शोकमस्य ददाति च भयं चास्य करोत्येष मोहयंस्तु मुहुः स एष कलुषः क्षुद्रश्छिद्रप्रेक्षी द्रु
द्रोधनं जय राजः प्रवृत्तो महात्मा मानुषाणामुपद्रवः ३७ कामस्यैव वैरित्वं दर्शयति धूमेनेति यथा धूमेन सह
जेन वह्निराव्रियते आच्छाद्यते यथा चादर्शो मलेनागंतुकेन यथा च उल्बेन गर्भवेष्टनचर्मणा गर्भः सर्वतो नि
रुध्यावृतः तथा त्रिप्रकारत्रयेणापि तेन कामेनावृतमिदं ज्ञानं ३८

गी०
३०
३

इदं शब्दनिर्दिष्टं दर्शयन्वैरित्वं स्फुटयति आवृतमिति इदं विवेकज्ञानं एतेनावृतं अज्ञस्य खलु भोगसमये कामः सुख
हेतुरेव परिणामे तु वैरितां प्रतिपद्यते ज्ञानिनः पुनस्तत्कालमप्यनर्थानुसंधानात् दुःखहेतुरेवेति नित्यवैरिणे
त्युक्तं किंतु विषयैः पूर्यमाणोपि यो दुःपूरः आपूर्यमाणस्तु शोकसंतापहेतुरनलतुल्यः ३९ अनेन सर्वान्
प्रति नित्यवैरित्वमुक्तं इदानीं तस्याधिष्ठानं कथयन् जयोपायमाह इन्द्रियाणीति द्वाभ्यां विषयश्रवणदर्शनाद
र्शनादिभिः संकल्पेनाध्यवसायेन च कामस्य आविर्भावात् इन्द्रियाणि च मनश्च बुद्धिश्चास्याधिष्ठानमुच्यते॥

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा कामरूपेण कौंतेय दुष्पूरेणानलेन च ३९ इन्द्रियाणि म
नो बुद्धिरस्याधिष्ठानमुच्यते एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनं ४० तस्मात्त्वमिन्द्रियाण्या
दौ नियम्य भरतर्षभ पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनं ४१

एतैरिन्द्रियादिभिर्दर्शनादिव्यापारवद्भिराश्रयभूतैर्विवेकज्ञानमावृत्य देहिनं विमोहयति ४० यस्मादेवं तस्मा
दिति आदौ विमोहात्पूर्वमेवेन्द्रियाणि मनो बुद्धिं च नियम्य पापरूपमेनं कामं हि स्फुटं जहि घातय यद्वा
प्रजहि परित्यज ज्ञानमात्मविषयं विज्ञानं शास्त्रीयं तयोर्नाशनं यद्वा ज्ञानं शास्त्रजन्यं शास्त्राचार्योपदेशजं
विज्ञानं निदिध्यासनं विज्ञाय प्रज्ञां कुर्वीतेति श्रुतेः ४१ राम
३०

यत्र चित्तप्रणिधानेन इंद्रियाणि नियंतुं शक्यंते तदात्मस्वरूपं देहादिभ्यो विविच्य दर्शयति इंद्रियाणीति इंद्रियाणि देहादिभ्यो ग्राह्येभ्यः पराणि श्रेष्ठान्याहुः सूक्ष्मत्वात् प्रकाशकत्वाच्च अत एव तद्व्यतिरिक्तत्वमापाततो दुर्ज्ञं भवति इंद्रियेभ्यश्च संकल्पात्मकं मनः परं तत्प्रवर्तकत्वात् मनसस्तु बुद्धिर्निश्चयात्मिका परा निश्चयपूर्वकत्वात् संकल्पस्य यस्तु बुद्धेः परस्तत्साक्षित्वेनावस्थितः सर्वांतरः स आत्मा तं विमोहयति देहिनमिति देहिशब्दोक्तः आत्मा स

इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ४२ एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना जहि शत्रुं महाबाहो कामरूपं दुरासदं ४३ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोध्यायः

इति परामृश्यते ४२ उपसंहरति एवमिति बुद्धेरेवेंद्रियादिजन्याः कामादिविक्रियाः आत्मा तु निर्विकारस्तत्साक्षीत्येवं बुद्धेः परमात्मानं बुद्ध्वा आत्मनैवंभूतनिश्चयात्मिकया बुद्ध्या आत्मानं मनः संस्तभ्य निश्चलं कृत्वा कामरूपं शत्रुं जहि मारय दुरासदं दुःखेनासादनीयं दुर्विज्ञेयगतिमित्यर्थः ४३ स्वधर्मेण यमाराध्य भक्त्या मुक्तिमिता बुधाः तं कृष्णं परमानंदं तोषयेत्सर्वकर्मभिः इति श्रीसुबोधिन्यां टीकायां तृतीयोध्यायः ३

एवंतावंदध्यायद्वयेनकर्मयोगोपायोयोगोपायोज्ञानयोगोमोक्षसाधनत्वेनोक्तः तमेवब्रह्मार्पणादिविधानेनतत्वंपदां
र्थविवेकादिनाचप्रपंचयिष्यन्प्रथमतावत्परंपराप्राप्तत्वेनस्तुवन् श्रीभगवानुवाच इदमितित्रिभिः अव्य
यफलत्वादव्ययंइमंयोगंपुराहंविवस्वतेआदित्यायकथितवान् सचस्वपुत्रायमनवेश्राद्धदेवायप्राहकथित
वान् सचमनुःस्वपुत्रायइक्ष्वाकवेब्रवीत् १ एवमिति राजानश्चतेऋषयश्चान्येपिराजर्षयोनिमिप्रमुखाः

श्रीभगवानुवाच इमंविवस्वतेयोगंप्रोक्तवानहमव्ययं विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेब्रवी
त १ एवंपरंपराप्राप्तमिमंराजर्षयोविदुः सकालेनेहमहतायोगोनष्टः परंतप २ सएवायंम
यातेद्ययोगः प्रोक्तः पुरातनः भक्तोसिमेसखाचेतिरहस्यंह्येतदुत्तमं ३ रामरामरामरामराम

स्वपित्रादिभिरिक्ष्वाकुप्रमुखैः प्रोक्तमिमंयोगंविदुर्जानंति अथतन्नानामज्ञानेकारणमाह हेपरंतप
पश्चात्तापनसयोगः कालवशादिहलोकेनष्टोविच्छिन्नः २ सएवेतिसएवायंयोगोविच्छिन्नसंप्रदायेस
तिपुनश्चमयातेतुभ्यंमुक्तः यतस्त्वंममभक्तोसिसखाचअन्यस्मैमयानोच्यतेहियस्मादिदमुत्तमंरहस्यं ३ राम